112/3

अथ

॥ जागदीशी चतुर्दशलक्षणी ॥

(न्यायशास्त्रम्)

Jaagadishichaturdasha-lakshani

696

अथ जागदीशी "चतुर्दशलक्षणी"



जागदे श्री
१

श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ समारब्धेति समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रति
पादनं व्याप्तिस्वरूपनिरूपणमित्यर्थः अव्याप्यवृत्तीति कपिसंयोगी एतत्त्वादित्यादावित्यर्थः इदं च येन रूपेण येन
संबंधेन साध्यवत्त्वं तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशमाहृत्य अन्यथा तु व्याप्यवृत्तिसाध्यकस्थलेऽपि विशिष्टाभा
वादिकमादाय दोषो बोध्यः अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतावव्याप्त्यभावादाह सद्धेताविति वृत्तिमद्धेताविति तदर्थः न
नु साध्यवद्भिन्नो यः साध्याभाववानित्यस्य चेत्साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वादिति न चावृ
त्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात्साध्याभाववत्तासमनियततादात्म्येन तस्यान्वयाविवक्षणाच्च भिन्नत्वे वैयर्थ्यमिति
वाच्यं तथापि साध्यवद्भिन्नात्मको यो मनुवर्थ्यः सवं धीतदवृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदवैयर्थ्यमौच्यादतः समासमास
समर्थ्यं व्याचष्टे साध्यवद्भिन्नेति तथा च साध्यवद्भिन्नस्यावृत्तावनन्वयापत्त्यासंनिवेशेन वैयर्थ्यं साध्याभावे साध्यवद्भिन्नवृ
त्त्वविशेषणमव्याप्यवृत्तिसाध्यकसंग्रहार्थमेवेत्याशयः साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति धूमादेस्सत्त्वादव्याप्तिरसंभवो वा
स्यादतः साध्याभावेति न च कपिसंयोग्येतत्त्वादित्यादेस्संग्रहार्थमधिकरणभेदेन अभावभेदमाश्रित्यैव लक्षणमिदं कार्यं
तथा च साध्यवद्भिन्ने योऽभावस्तदवृत्तित्वमित्यस्यैव सम्यक्त्वे साध्यपदं व्यर्थमिति वाच्यं प्रतियोगितासंसर्गेण साध्यीय
त्वेनैव साध्याभावस्य प्रवेशेन तत्त्वभावस्यापि तद्वैयर्थ्यशंकानवकाशात् वस्तुतः स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भि

न्नेवर्तते यः साध्यतावच्छेदकसंबंधेन साध्याभावस्तद्वद्वृत्तित्वमर्थः तथा च साध्यतावच्छेदकसंबंधेन साध्यवत्त्वार्थक
स्य साध्यपदस्यानुक्तौ स्वप्रतियोगितानवच्छेदकीभूतसमवायादिसंबंधेन वह्न्यादिमतो ऽप्यन्यस्मिन्पर्वतादौ वर्तते यः समवाया
द्यवच्छिन्नवह्न्याद्यभावस्तद्वद्वृत्ति धूमादेस्सत्त्वादव्याप्तिः स्यादतस्तदुपात्तमिति तन्न व्याः केचित्तु व्याप्यवृत्तित्वादिविरुद्धधर्माध्या व्याप्यवृत्तित्व
सात्संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदो न तु गगनाद्यभावस्यापि मानाभावात् तथा च साध्यवद्भिन्नवृत्तिगगना
द्यभाववति धूमादेस्सत्त्वादव्याप्तिरतस्साध्यपदमित्याहुः तन्न द्रव्ये गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्येन तु द्रव्ये गगनाभा
वेन यावत्त्वमित्यादिप्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्येन तदभावयोः विरुद्धधर्मयोस्संभवादिति दिक् न च घटत्व
घटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्तमानस्य गगनसंयोगात्मकसाध्याभा
वस्याधिकरणे गगनत्वहेतोस्सत्त्वादिति वाच्यं अभावाभावस्यातिरिक्ततामते एवं एतद्दूषणाकरणादिति भावः भिन्नत्वं तु
२ निरुक्तनिष्ठसंयोगाभाववतो भिन्नत्वं इत्यर्थः मानाभावादिति तथा चात्राप्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः अव्याप्तेर
ति न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसंभव एवं वक्तुमुचितो नाव्याप्तिरिति वाच्यं वह्निमान् गगना
दित्यत्र अवृत्तिगगनादिहेतौ लक्षणासंभवात्तस्यापि सद्धेतुतायाः स्वयं वक्ष्यमाणत्वादिति भावः साध्यपदस्य सिद्धिकमेतत्तु क्षिप
रते यान्तत्त्वतावच्छिन्नान्योन्याभावसामानाधिकरण्यरूपस्य पर्यवसितार्थस्य द्रव्यं पृथिवीत्वादित्यादावव्याप्तेः संभवात् ग घवत्ति

जागदीशी

पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदंति सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिध्याव्यभिचारिण्यतिव्या
प्तिवारणाय यद्यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान्धूमादित्येतावव्याप्तिस्तत्रापि तत्तद्विपक्षावृत्तित्वावच्छिन्ना
भावरूपस्य तत्तत्साध्यवृत्तित्वावच्छिन्नाभावरूपस्य वा साध्यप्रतियोगिताकाभावस्याप्यधिकरणाप्रसिद्धेः अत आह
साकल्यं साध्याभावेति तथा च साकल्यं न साध्याभावविशेषणमतो नाप्रसिद्धिरिति भावः केचित्त्वेवमपि साध्याभावव
न्निष्ठविरहानर्गतमहानसादिवृत्तिमीनस्याभावस्य प्रतियोगित्वं मीनादौ नास्तीत्यव्याप्तिरिता द वस्थ्यमत आह साध्ये चेति त
था च सपक्षे महानसादिनि सकलसाध्याभाववान्निरुक्तदोषः प्राचां तु व्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववतीत्यावश्य
विशेषणोदेवस्य साध्याभावपदसार्थकं भवत्यतः साध्याभाववत्त्वेव साकल्यं प्राक्प्रयोजयन्ति साकल्यमित्यादिनेत्यता र
यन्ति तन्मते साध्याभाववतीति साकल्यानुक्तौ च व्याप्तिव्यभिचारकत्वेव साध्ये साकल्यविशेषणस्य प्रयोजनमतः साध्यैकत्व संभवा
दन्यथा गगनाविज्ञि धर्मवान्द्रव्यत्वादित्यादौ परत्वादिलक्षणानेते साध्यव्यक्त्यभावच द्रूणादिनिष्ठाभावप्रतियोगि
त्वद्रव्यत्वादावतिप्रसंगादिति ध्येयं ननु साध्यवत्त्वापिद्धत्वा घटत्वावच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिताकाभा
वस्य सत्वादसंभवः [illegible] सकलपदोत्तरं नान्नास सकलसाध्यप्रतियोगिताकाभाववत्तोनुपपत्त्यापत्तेतिनसंभवः सकलप
दस्यकेवलपदपर्यायोप्यनुपपन्न इत्यत आह साध्याभाववतीति तथा च साध्याभाववत्त्वे व साकल्यं देयं न तु साध्ये पीति भावः

२

साध्याभाववद्वृत्तिसाकल्यप्रयोजनमाह तेनेति विपक्षैकदेशः किंचिद्विपक्षः साध्यनिष्ठसाकल्यस्य साध्यतावच्छेदकावच्छिन्न
भाववस्यावाधिवृक्षायाः फलमाह नानेति एकव्यक्तिसाध्यके सकलसाध्योक्ताव व्याप्तिरप्रसिद्धा स्यात्तस्याः पर्यायेण नानेत्युक्तम् अव्याप्य
वृत्तीति कपिसंयोगेऽपि तत्त्वादित्यर्थः पूर्वपक्षे हेत्वधिभावस्यापि प्रतियोग्यवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यव्या
प्यवृत्तिहेतावव्याप्तिः संभवतीति तथापि पूर्वश्रुतमूलत्वेन तत्राव्याप्तिरित्याद्युक्तापि तु व्याप्यवृत्तिहेतुमूलकाव्यभिचारितामिति १ तद्धेस
लवानुकपिसंयोगादित्यादावित्यर्थः अभावत्वं इति साध्याभावे हेत्वभावे चेत्यर्थः अत्र च साध्याभावे प्रतियोगिवैयधिकरण्य
साध्यतावच्छेदकसंबन्धेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वेन धूमाद्यभाववतो यत्पर्वतादेः कालिकादिसंबन्धेन धूमादिमत्त्वे
पि नाव्याप्तिः हेत्वभावप्रतियोगिवैयधिकरण्यं तु प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं घटितं वा चैतेनाय
मात्मत्वानादित्यादौ साध्याभाववतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेऽपि नाव्याप्तिः हेत्वभावोपादानं विना साध्याभावसं
ग्रहेऽसत्वेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः यद्यपि साध्याभावोपादानमेव क्रमानुरोधात्तु मुचितं अपि शब्दादेव हे
त्वभावस्य लाभः संभवात् तथापि तत्प्रतियोगिव्यधिकरणत्वं चेत्यर्थं तेनेन तत्पदेनाभिदिष्टहेत्वभावपरामर्शसंभवात् हेत्वभावप्रतियो
गित्वं चेत्यभिधानेऽगौरवादेवमभिधानं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति प्रतियोगिपदं प्रतियोगितावच्छेदकता घट
कसंबन्धेनावच्छेदकस्य विशिष्टलाभाय तेन हृदादौ कालिकादिसंबन्धेन धूमत्वावच्छिन्नस्य काष्ठादेः संयोगसंबन्धेन

जागरेषी

सत्त्वेपि नाव्याप्तिः तत्सप्रतियोगित्वं हेत्वभावप्रतियोगित्वं हेतुतावच्छेदकरूपे(?)ति हेतुतावच्छेदकसंबंधेनेत्यपि वक्तव्यं तेनाभि
न्नद्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य कालिकादिसंबंधाव
च्छिन्नद्रव्यत्वाभावस्य प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः न च(?) हेतुतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्योक्तौ वह्नि
व्याप्तिवारणासंभवाद्धेतुतावच्छेदकसंबंधेन प्रतियोगित्वविवक्षा व्यर्थेति वा(?)च्यं तथा सति निर्धूमत्वव्याप्यवान्निर्वह्नित्वादि
त्यादौ निर्वह्नित्वभेदमादाय वैलक्षण्यासंभवेन निर्धूमत्वव्याप्यत्वस्य तत्र ग्रंथे वक्ष्यमाणव्याप्यत्वलक्षणकतापत्तेरिति (?) हेत्वभावप्र
तियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह तेन द्रव्यत्वादि(?) अन्यथा साध्याभाववद्वृत्तिगु
णादिविशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिः स्यादिति भावः (?)च द्रव्यत्वस्य साध्यताया
सकलसाध्याप्रसिद्ध्याव्याप्तेरुक्तविवक्षयाप्यप्रतीकारादौ तदेतेन गुणवत्त्वादि साध्यप्रग्रहः द्रव्येतरासमवेतक
मात्रवाप्रवृत्तेर्द्रव्यत्वमिति वाच्यं हेतुतावच्छेदकावच्छिन्नप्रतियोगित्वविवक्षायाः फलमाह नवेति सत्वादावति द्रव्य
त्वादौ साध्य इत्यनुवर्त्तनीयं तेन एकव्यक्तिकमिति न तथा च द्रव्यं पृथिवीत्वादित्यत्राव्याप्तिः सकलसाध्याप्रसिद्धेरित्यर्थः
नन्विदं वाप्य स्वरसात् साध्यसामान्याभावस्यैवानिवेशितत्वात् साध्यसाकल्यं न देयमेवेत्यत आह विपक्षो वेति तथा
चैकव्यक्तिके साध्याभाववतीति न त्वगगनत्वेत्ति धर्मवान् गगनान्यत्वादित्यादावव्याप्तिः साध्याभाववतः सा ३

निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं ॥ ५
कत्वाप्रसिद्धेरित्यर्थः साध्यादिभेदेनव्याप्तेर्भेदाद्यत्रैकव्यक्तिकएवविपक्षस्तत्रयलक्षणेसाध्याभाववतिसाकल्यंविराध
रणनदेयमतोदोषांतरमाह निर्धूमत्वव्याप्येति निर्धूमत्वस्यसाध्यत्वे यत्रैकव्यक्तिकमित्वनेनैवगतार्थतास्यादतोव्याप्यपर्यंतंनिर्धू
मत्वव्याप्यस्यापिसिद्धिः ह्रदादेःस्नेहत्वादिनासाध्यत्वेतुह्रदाभावस्यव्यभिचारित्वात्तदकंग्रहोनदोषइत्यतउक्तंतत्वेनसाध्यइतिनिर्धूमत्व
व्याप्यत्वेनसाध्यइत्यर्थः प्रत्येकमितिहेत्वभावस्यमहानसीयादिवन्हेस्साध्याभाववत्सकलांतर्गतपर्वताद्यवृत्तित्वादव्याप्तेरि
तिभावः निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नयद्धर्मावच्छिन्नाभावत्वंतद्धर्मवत्वंव्याप्तिरित्युक्तौनैषदोषइतिध्येयं ननुसाध्यवत्
तियोगिकान्यत्वस्यधूमादिमतिसत्वादव्याप्तिरतआह अत्रेति तत्रअन्ययाचसाध्यवत्पदेननिरूढलक्षणयोपस्थापितस्यविशिष्ट
साध्यवत्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेनान्यत्वेनतादात्म्येनान्वयात्साध्यवत्तिचसाध्यवत्वावच्छिन्नभेदासत्वा
न्नाव्याप्तिःगुरुधर्मस्यावच्छेदकत्वोपगमाच्चद्रव्यंपृथिवीत्वादित्यादौद्रव्यत्वविशिष्टद्रव्यत्वावच्छिन्नप्रतियोगिताकभेदास
त्वान्नाव्याप्तिरितिभावःयद्धर्मविशिष्टबोधकपदासमभिव्याहृतेनान्यादिपदेनोपस्थापितेन्यत्वादौतद्धर्मावच्छिन्नप्रतियो
गिताकत्वप्रकारेणैवतादात्म्येनान्वयःनतुतद्धर्माश्रयप्रतियोगिकत्वेनेत्यत्रव्युत्पत्तौमानमाहनहीतिनयाचतादृशव्युत्पत्त्य
स्वीकारेनीलघटेघटप्रतियोगिकभेदसत्वान्नीलघटोघटान्यइत्यपिव्यवहारःस्यादितिभावः अत्रेति इदंघटान्यादित्यप्र
योगायन्निष्ठप्रतियोगिताकत्वेनटभेदोन्यादिशब्देनबोध्यस्तद्वृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वात्ततएवघटोघटान्य

जागदेशी

इत्यस्य वारणासंभवान्नीलघटत्वस्यैव तदनुयोगितावच्छेदकत्वानुधावनमिति मन्तव्यं नीलघटो घटयन्य इत्येव पाठस्सम्यक् तत्
थैव प्रकृतौ पर्यावसितत्वसंगतेः घटादन्य इति पाठे स्फुटं साध्यवदन्यस्यत्र पंचमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थता
वच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमात्यकर्थ्यं चेत्संगमनीयः घटः पटो नेत्यादौ पटपदं मुख्यार्थपरमेव न तु प्रकृत
इव पटत्वावच्छिन्नप्रतियोगिताकपरं निपातातिरिक्तस्थल एव नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया नञ्पदोपस्थाप्यभेदे पट
त्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्वयसंभवात् पटत्वावच्छिन्नप्रतियोगिताकत्वं पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चे
ति त्रितयमेव विशेष्यविशेषणभावापन्नं संसर्गो न तु वस्तुगत्या पटत्वावच्छिन्नं यत्प्रतियोगित्वं तन्मात्रं पटनेत्यत्र पटत्वाव
च्छिन्नस्याप्यनुभवविरुद्धत्वात् अन्यथा प्रतियोगिताव्यक्तिभिरेव तत्तद्विशिष्टबुध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यान्मा
नाभावात् अत एव केवलान्वयिन्यपि वह्निर्नास्तीत्यत्र वह्नित्वे तदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वयम
प्युक्तं इत्यं च प्रमेयं नास्ति कपिवृत्ति वादिवादिमान्नास्तीत्यादि शाब्दबोधानां संसर्गकोटौ व प्रतियोगितायां प्रमेयत्वाद्यव
च्छिन्नत्वावगाहितया भ्रमत्वं संसर्गप्रकारसाधारणविशेष्यभावस्यैव भ्रमत्वादिघटकत्वात् अन्यथा स्वरूपसंबंधेन प्र
मेयत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्यालीकतया अखंडतत्संबंधेन प्रमेयस्याभावे धर्मित्वपन्वयासंभवेन भ्रमत्वानुपप
त्तेः सद्गुणगोणाप्यसतः संसर्गमर्यादया भानस्यानंगीकारात् कुत्कुलेन पटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेन चा

भावेप्रमेयस्यसत्वेनतादृशसंबंधेनभ्रमत्वस्यवक्तुमशक्यत्वात्घटत्वादेरन्वयितानवच्छेदकतयातदवच्छिन्नप्रति
योगिताकत्वसंबंधेनप्रमेयत्वादिविशिष्टस्यान्वयिनिराकांक्षत्वात्अन्यथाघटवत्यपिघटोनास्तीत्यादेःप्रमाणत्वा
पत्तेस्तद्घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनघटविशिष्टघटविशेषाभावस्यतत्रसत्वात् एतेनसत्तासमवायिन्यपिगु
णादौविशिष्टसत्ताभावावच्छिन्नस्यसमवायेनासत्त्ववत् घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनघटत्वावच्छिन्नवत्ते
घटघटाभावस्यनतादृशसंबंधेनप्रमेयत्वावच्छिन्नवत्वमतःप्रमेयंनास्तीत्यादौघटत्वाद्यवच्छिन्नप्रतियोगित्वसंबंधेनप्रमे
यत्वावच्छिन्नस्यैवाभावबोधेभ्रमत्वमपिप्रत्युक्तंघटत्वादेरन्वयितानवच्छेदकतयातदवच्छिन्नप्रतियोगितासंबंधेनप्रमे
यत्वविशिष्टान्वयिनिराकांक्षतयातथाशाब्दस्यासंभवादितिध्येयंनीलोघटोनास्तीत्यादौतुनीलघटत्वस्यान्वयितावच्छेदक
त्वेनातादृशधर्मावच्छिन्नप्रतियोगित्वमेवसंसर्गोनतुनीलत्वादिप्रत्येकावच्छिन्नप्रतियोगित्वेनीलपटस्यपीतघटस्यचाभा
वेऽपितादृशप्रयोगानापत्तेःनीलोपलक्षितनयघटत्वमात्रस्यान्वयितावच्छेदकत्वेतुघटत्वावच्छिन्नप्रतियोगित्वमे
वतथासंयोगेनघटोनास्तीत्यादौतुतृतीयाविभक्तेःनावच्छिन्नत्वमर्थःसंसर्गीभूतप्रतियोगितायांतदन्वयासंभवात्किं
तुअवच्छिन्नप्रतियोगित्वंप्रतियोगिमात्रवाऽनवच्छिन्नत्वसंसर्गेणसंयोगादेस्तत्रान्वयादेवविशिष्टलाभसंभवात्
नचैवंसंयोगेनकपालेघटाभावस्येवसमवायेनघटविशिष्टद्रव्यत्वाभावतयासमवायेनकपालेघटोनास्ती

जागदीशी

ति व्यवहारापत्तेः। न्त्रीयांतसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात् समवायावच्छिन्नघ
टप्रतियोगिताकाभावस्य च कपाले विरहात्। अस्तु वा घटत्वावच्छिन्नत्वस्यैव संयोगसंबंधावच्छिन्नत्वस्यापि प्रतियोगि
त्वांशे संसर्गमर्यादयैव भाने न्त्रीयांतसमभिव्याहारस्य नियामकत्वाच्च नातिप्रसंगः। घटानधिकरणो भूतलमित्यादौ
तु लक्षणया अधिकरणपदमेव घटाधिकरणार्थकं घटपदं तु तात्पर्यग्राहकं अन्यथानधिकरणपदे नाधि
करणसामान्याभिन्नत्वोक्तौ भूतले तस्य वा घटस्यानन्वयात् न च घटान्वितस्यैवाधिकरणस्य भेदस्तत्र नञा बोध्यते यः समासा
न्तर्गतेन नञा इतरपदार्थमात्रान्वयित्वव्युत्पत्तेः अन्यथा नीलो घटो घट इत्यादौ नीलघटान्यस्य घटत्वे नीलाप्रमेयः
पट इत्यादौ नीलप्रमेयान्यस्य पटत्वप्रतीयेत वस्तुतः ससंबंधिकपदस्थले व्युत्पत्तिवैचित्र्या प्रतियोगितानव
च्छेदकं घटानधिकरणमित्यादौ घटान्वितस्यैवाधिकरणभेदो भासत इति परमार्थः। पीतः शंखो नास्तीत्यादौ शाब्द
बोधस्तु न शंखत्वावच्छिन्नतया प्रतियोगित्वमवगाहते तेन न मात्रस्यान्वयितानवच्छेदकत्वात् शंखत्वतया निश्चिते
धर्मिण्यपि तादृशप्रयोगात् पीतशंखत्वावच्छिन्नप्रतियोगिताकत्वे न संसर्गमर्यादया प्रतियोगित्वमवगाहते तेन
नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहिबोधस्याप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्र
तियोगितात्वेन प्रतियोगिताया संसर्गकबोधजनकत्वव्युत्पत्तेः। इयांस्तु विशेषः यत् घटो नास्तीत्यादिशाब्दे सा

सांसर्गिकप्रतियोगित्वावगाहित्वाप्रसिद्धेः न घटत्वावच्छिन्नप्रतियोगित्वेनैव निरूपितानां पातःशंखो नास्तीत्यादौ तु व
त शंखत्वावच्छिन्नप्रतियोगित्वेनाप्रसिद्धेर्नैवसादिकं वऊतरमूहनीयं साध्यसामानाधिकरण्यपदस्य साध्यवद्भि
न्नवृत्तित्वार्थकत्वे साध्यवद्व्यधिकरणेत्यादिद्वितीयलक्षणेन पौनरुक्त्यापत्तेरतो व्याचष्टे साध्यसमाना
धिकरणं यस्येति तत्त्वमिति पूर्वेणान्वयः वह्निमात्रस्यैव व्यधिकरणान्तः धूमासमानाधिकरणत्वाद्ह्रदादिर्वह्निमान्धूमादित्या
दावव्याप्तिरतो व्याचष्टे यदधिकरणेति यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्य
र्थः तत्त्वं धूमाधिकरणं न तु वह्निसामान्यानधिकरणमतो नाव्याप्तिरिति भावः ननु घटादिस्वरूपं यदधिकरणं साध्य
तन्न धूमाद्यनधिकरणं साध्यते वृत्तित्वानधिकरणत्वं वह्न्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः यद्यदधि
करणं साध्यानधिकरणं तत्तद्वृत्तित्वानधिकरणत्वोक्तौ महागौरवमत आह साध्यनिष्ठेति साध्यनिष्ठाभावप्रतियोगित्वे
सद्धेतोरप्यसत्त्वात्स्यतः सामानाधिकरण्याभावउक्तेः न च साध्यनिष्ठाभावसामानाधिकरण्याभावस्य प्रतियोगित्वं सामाना
धिकरण्यमेव न तु वह्न्यादावपि सद्धेतावतिव्याप्तिः साध्यनिष्ठाभावप्रतियोगिवृत्तितानिरूपकाधिकरणवृत्तित्वस्यावि
वक्षितत्वात् वस्तुतः सामानाधिकरण्यं न संबंधेनाभावस्सामानाधिकरण्याभाव इति तु परमार्थः न चैवं द्रव्यं पृथि
वीत्यादावव्याप्तिस्सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्ये सत्त्वादेतदस्वरसेनैव कल्पांतरं वक्ष्यतीति न

जागदीशी

न्वेवमपिवह्निमान्धूमादित्यादौविषमव्याप्तेहेतावव्याप्तिःवह्निनिष्ठस्यपर्वतवृत्तित्वाभावस्यप्रतियोगित्वंयदाधेय
त्वंतन्निरूपकेपर्वतादौधूमादेर्वर्तमानत्वात्साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयत्वानिरूपकाधिकरणवृत्तित्वेतौ
महागौरवमत आह साध्यनिष्ठाधेयत्वेति अत्राधेयत्वंसाध्यतावच्छेदकसंबंधेनग्राह्यंतेनरूपवान्महाकालत्वा
दित्यादौसंबंधेनसामान्यनरूपनिष्ठाधेयत्वानिरूपकेगगनादौहेतोरवृत्तित्वेपिनाव्याप्तिःतद्वत्तोसाध्यवद्भिन्नत्व
त्तौननुसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यंहेतुताघटकसंबंधेनवाच्यं अन्यथावह्निनिष्ठाधे
यत्वानिरूपकेस्वावयवेसमवायादिनाधूमादेस्सत्वादव्याप्त्यापत्तेः तथाचसत्तावान्द्रव्यत्वात् मधूमादेस्यादौअ
व्याप्तिःसाध्यनिष्ठाधेयत्वानिरूपकेजात्यादौसमवायेनसंयोगेनवावृत्त्यप्रसिद्धेः किंचद्रव्यविशिष्टसत्वादित्या
दावव्याप्तिःद्रव्यत्वनिष्ठाधेयत्वानिरूपकेगुणादिवृत्तित्वस्यविशिष्टसत्तायांसत्वादत आह साध्यनिष्ठेति धूमनि
ष्ठाधेयत्वानिरूपकेजलादौवह्न्याद्यधिकरणत्वाभावस्यसत्वाद्व्यभिचारितयातिव्याप्तिरतोव्यापकेति।व्यापक
त्वंतुप्रतियोगिवैयधिकरण्यघटितमेवग्राह्यंतेनसंयोगेनवह्न्यधिकरणत्वस्याव्याप्यवृत्तितयातदभावस्यतत्सा
यःपिण्डादौवृत्तित्वेपिनातिव्याप्तिःवह्न्यधिकरणत्वगगनोभयत्वावच्छिन्नाभावस्यधूमनिष्ठाधेयत्वानिरूपका
धिकरणत्वसामान्याभावत्वेव्यापकत्वादतिव्याप्तिरतःसामान्यपदं तथाचहेतुताघटकसंबंधावच्छिन्नय

द्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः तेन वह्न्या
नधिकरणत्वाभावस्यापि जलादौ कालिकसंबंधेन धूमाधिकरणतायाः सत्त्वेपि नाव्याप्तिः न वा वह्न्यधिकरणत्वा
भावस्यापि प्रमेयत्वादिना धूमानधिकरणत्वव्यापकत्वेप्यतिव्याप्तिः नवी हेतुतावच्छेदकसंबंधेन यद्धर्मावच्छिन्नाभा
वत्वेन तादृशाधिकरणताव्यापकत्वमिष्यते एव सम्यक्त्वे अधिकरणत्वाभावपर्यंतानुप्रवेशो व्यर्थ इति वाच्यं वस्तुनियामक
संबंधेन हेतुतायामव्याप्तिप्रसंगात् तादृशसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धेः अस्माकं तु तादृशसंबंधेन यद्धेतुसंबंधित
तस्य स्वरूपसंबंधावच्छिन्नाभावमादाय लक्षणसंभवात् किंच अधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादिसंबंधे
नापि रूपादिहेतावतिव्याप्त्यापत्तिः संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयत्वानिरूपकाधिकरण
त्वव्यापकत्वादिति भावः साध्यवद्भिन्नेति अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणताकत्वनिष्ठो ग्रा
ह्यः तेन सत्तावान् द्रव्यत्वादित्यादौ नातिव्याप्तिः ननु प्रागुक्तस्यार्थस्य शब्दांतरेणाभिधानमन्वादः स चात्रासंभवी साध्ये
यदधिकरणानधिकरणं तत्त्वानधिकत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तेः साध्यानधिकरणान
धिकरणत्वशब्देन अभिधानात् आह चरमेति तत्त्वाधिकरणत्वाभावेन तत्त्वाभावस्य प्रवेशाद्वैयर्थ्यं न संभवतीत्यत उक्तो
अनतिरिक्तप्रयोजनेति तथा च प्रकृतलक्षणवाक्यस्य साध्यवदनधिकरणानधिकरणत्वाभाववत्तात्पर्यो

न्तप्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमनुवादः स चात्र सम्भवत्येवेति भावः साध्यमित्यादि साध्यानधिकरणेत्यादेरनन्त
व्यत्यासेन चरमाधिकरणांशेन सहोन्नयादेवानुवादादेतल्लाभ इत्याशयः। केवलान्वयिनीति। अव्याप्तिरिति परेणान्व यः
गमव्याप्यो हेतुमाह साध्यानिष्ठेति। केनाव्यक्तिकेति। मूलोक्तधूमहेतुमभिप्रेत्येतेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्ति
साध्यकाव्याप्तिविरहेऽपि न क्षतिः न्यूनतां परिहरति। विशिष्टसत्तावान् जातेरित्यादावित्यर्थः। विशिष्टधर्मावच्छिन्नाधिकरणत्वस्यैवत ग
दवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः। यत्किंचिदिति। साध्यवत्ताघटकत्वावच्छिन्नभेद इत्यर्थः नानाधिकरणसाध्यकेति
यत्र साध्याभावच्छेदकावच्छिन्नाधिकरणं नानेत्यर्थः तेनैकस्यामपि पर्वते वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेऽपि न वह्निसाध्य
कधूमादेः संग्रहः सर्वत्रेति केवलान्वयिनीत्यन्ये चाभिक्तत्वं सार्वभौमतामुद्भावयति केचित्त्विति। हेत्वधिकरण इति। सप्तम्यर्थो
ऽवच्छेदकत्वं तच्च साध्यवद्वृत्तित्वाभावेऽन्वितं। तेनैवेति। हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थः तथा च साध्यवद्वृत्तित्वेन सहान्वयः
साध्यवद्भिन्नत्वे येन सम्बन्धेन येन रूपेण साध्यता तत्सम्बन्धेन तद्रूपावच्छिन्नवत्त्वं बोध्यं तेन समवायेन वह्नेः साध्यत्वे धूमे विशि
ष्टसत्त्वसाध्यके सत्तादौ च नातिव्याप्तिः तदधिकरणभिन्नत्वाभिमतस्य तदभाववत्त्वोक्तौ द्रव्यं सत्त्वादित्यादावतिव्याप्तिर्गुणा
वच्छेदस्य द्रव्यवृत्तित्वाभावस्यैवाद्रव्यावच्छेदेन सत्तायामभावसत्त्वादतो भिन्नत्वपर्यन्तानुसरणं। भेदस्य तु नाव्याप्यवृत्तित्वं तद्
व्याप्यवृत्तित्वे तु नारूपाभाववतो यावतीसत्तावच्छिन्नवृ वत्त्वं वक्तव्यमिति भावः। हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरण इत्य ६

स्य फलमाह स्वावयवे संयोगेनेति वह्नेर्वृत्तावपि न क्षतिरित्यन्वयः तथा च तादृशसंबंधेन हेत्वधिकरणत्वाप्रवेशे स्वावयवाव
च्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वात्ते वह्निमान्धूमादित्यादावव्याप्तिस्स्यात् न पुनरसंभवो वाच्यं तेन पर्वतादित्यादावेव लक्ष
णासंभवादिति भावः अत्र चोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वे रूपवद्भिन्नत्वमित्यादिप्रतीत्या घटे पृथिवीत्वादौ नाव्याप्ती रूपव
द्भिन्नत्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यमिति न रूपवान्पृथिवीत्वादित्यादौ नाव्याप्तिः तत्र घ
टनिष्ठावच्छेदकत्वस्योत्पत्तिकालावच्छेदादिति ध्येयं तेनैवेत्यस्य फलमाह वह्निमानिति च समवायेनेति हेतुतावच्छेदकसंबंधेन
साध्यवद्भिन्नत्वानुक्तौ संबंधसामान्येन हेत्वधिकरणावच्छेदकसाध्यवद्भिन्नत्वभावसामान्याभावेनानुप्रवेश्यः साधनाधिकर
णावच्छेदकतादृशाभावस्याप्रसिद्धेः किंतु यत्किंचित्संबंधेन तद्भिन्नत्वस्याभावः प्रवेशनीयः तथा च हेत्वधिकरणपर्वतावच्छेदेन
धूमादौ वह्निमत्समवेतत्वाद्यभावसत्त्वादसंभवः स्यात् यदि तेनैव संबंधेन साध्यवद्भिन्नत्वप्रवेशो न स्यादिति भावः ननु
हेत्वधिकरणावच्छेदेन तद्धेतुविशिष्टस्य साध्यवद्भिन्नत्वाभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसंभवि तदधिकरणस्यैव
तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्समवेतसंयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेदकत्वादत आह तादृशा
भावश्चेति हेत्वधिकरणावच्छेदेन साध्यवद्भिन्नत्वाभावश्चेत्यर्थः संबंधांतरेण हेतुतावच्छेदकसंबंधान्यसंबंधेन तथा च हेतुमत्प
र्वतावच्छेदत्वविशिष्टस्य वह्निमत्संयुक्तत्वाभावस्याधिकरणत्वं पर्वतेन रूपादावेव प्रसिद्धमिति भावः यद्यपि रूपादौ वह्निम

जागदेशी
८

संयुक्तत्वाभावस्य व्याप्यवृत्तित्वात्तत्र पर्वतादिकेऽभावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकस्वीकारात् ऽप्रसिद्धितावस्थैव न
च महानसादिसंयुक्ते कालिकादिसंबंधेन पर्वतनिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेदत्वप्रसिद्ध्या न दोष इ
ति वाच्यं इदमपि एतद्रूपवानिति ऽसादित्यादौ एतद्साधिकरणावच्छेदेनैव तद्रूपवत्संयुक्तसमवेतत्वाभावस्याप्रसिद्धेर्दुर्वार
त्वात् तथापि पर्वतावच्छेदेन तदीयरूपेण वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकस्वीकारादित्थमभिधाने
हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वे न वाऽगत्या तात्पर्यं तथा च व्याप्यवृ
त्तेरवच्छेदकासत्त्वेपि साध्यवद्वृत्तित्वविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तद्भिन्नत्वमादायैव लक्षणसंगतिः न चैवमेतत्
त्याय साध्यवद्वृत्तित्वाभावविशिष्टयदधिकरणत्वं हेतुमतस्तदन्यत्वोक्तौ वह्निमान्धूमादित्यादावव्याप्तिः स्वावयवावच्छे
देन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात् साध्यवद्वृत्तित्वाभावविशिष्टय
वृत्तित्वावच्छिन्नाधिकरणत्वं हेतुमतः तदन्यत्वोक्तौ तु वह्निमान्धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासंभवः
साध्यवत्संयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तित्वस्य गुरुतया प्रमेयरूपत्वावच्छिन्नाधिकरणताया इव तदवच्छि
न्नाधिकरणत्वाप्रसिद्धेः केवलान्वयिन्यव्याप्तिप्रसंगे सत्येव विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदके
त्वकल्पनादिति वाच्यं सार्वभौमानां मते प्रतियोगिताया इव अधिकरणताया अपि गुरुधर्मावच्छेद्यत्वोपगमात् ८

अन्यथा समवेतत्वत्वादिकमपेक्ष्य सत्तावृत्तिसमवेतत्वस्य गुरुतया साध्यतावच्छेदकत्वावच्छिन्नप्रतियोगि
ताकाभावाप्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिप्रसंगात्। ननु सामानाधिकरण्यवतः ननु तदभाववत्त्वमतो द्रव्यस
त्वादित्यादौ व्यभिचारिण्यतिप्रसंग इत्यत आह। व्यभिचारात् इति। तादृशेति। हेतुतावच्छेदकसंबंधेन हेतु
मतीत्यर्थः। तादृशाभाववत्त्वं साध्यवदन्यवृत्तित्वाभावत्वं अत्र चानुभवप्रमाणमिति। सत्तायामित्यादि। एवं सत्तायाम
पि द्रव्यत्वसामानाधिकरण्यविरहेपि नाव्याप्तिः। विशिष्टसत्वरेति। विशिष्टसत्वशब्दबोध्यहेतावित्यर्थः यथा
अन्येन गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तौ वव्याप्त्याशंकायाः उत्तरग्रंथेन निरासादसंगत्यापत्तेः। अतिरि
क्ते विशेषणविशेष्याभ्यामभिन्न इत्यर्थः। तथा च गुणादिकहेतुत्वाधिकरणे। अतो नाव्याप्तिः। उभयत्वमपि
एकविशिष्टापरत्वमेव तच्चातिरिक्तमेव न। ततः स्पर्शवान् मूर्तत्वमूर्तत्वोभयस्मादित्यादावव्याप्तिरिति भावः
यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्वादिहेतौ नाव्याप्तिन्न च
धूमाधिकरणमहानसावच्छेदेन पर्वतीयादिधूमेवह्निमत्संयुक्तत्वाभावस्य चालितत्वात्। न्यायेन सत्वाद्व्या
प्तिः महानसादावपि कालिकादिसंबंधेन पर्वतीयधूमाद्यधिकरणत्वात्साध्यवद्वृत्तित्वाभाववत्तायाम्

॥

वच्छेदकत्वादितिवाच्यंस्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्भेदत्वाभावतद्वृत्तिधर्मवत्वाभावनिरूपितार्थस्य
तत्तद्धूमत्वधर्ममादायैवधूमादौलक्ष्यसंभवेनधूमत्वस्यहेतुतानवच्छेदकत्वेपिस्वत्वभावात्तस्यापिविशिष्ट
स्यातिरिक्तत्वात्ततएवाव्याप्तिवारणसंभवेहेतुतावच्छेदकावच्छिन्नाधिकरणप्रवेशेगौरवमसंभवोवाविशि
ष्टनिरूपिताधिकरणत्वाप्रसिद्धेः। एवंधूमत्वादेर्व्याप्यतानवच्छेदकत्वतादवस्थ्येनकथायांहेतोरूपन्यासान्न
स्यादित्याशयः। नतुविशिष्टस्यातिरिक्तत्वेमानाभावः। नचगुणोविशिष्टसत्तावानितिप्रतीत्यभावएवमानं
गुणस्यविशिष्टनिरूपिताधिकरणत्वविरहादेवतादृशप्रतीत्यसंभवात्। नचविशिष्टसत्तानिरूपिताधि
करणत्वंयद्यतिरिक्तंतदाविशिष्टहेतुत्वातिरिक्तमस्तुविशिष्टाधिकरणतायाःलघुसाधिकरणस्यस्व
रूपत्वाभ्युपगमात्। किंचविशिष्टस्यातिरिक्तत्वेद्रव्यंविशिष्टसत्तावदितिनिर्णयदशायामपिद्रव्यं
सत्त्ववदितिप्रत्यक्षप्रसंगः। सत्ताभाववुद्धिप्रतिसत्तानिष्ठप्रत्यक्षस्यैवविरोधितयातदसत्वात्। स्वातंत्र्ये
णाविरोधित्वंतरकल्पनेगौरवात्। एवंविशेषणविशेष्योभयग्राहकसामग्रींविनापिविशिष्टग्रा
हप्रसंगः। तदुभयग्राहकसामग्र्याःविशिष्टहेतुत्वकल्पनेगौरवात्। तंस्फुटमेवेत्यतआह। अनति ९

क्तत्वेऽपीति गुरुत्वस्य विशिष्टस्यातिरिक्तत्वादिति यं प्रत्ययविशिष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः तथा च हे
तुतावच्छेदकविशिष्टहेत्वधिकरणतावच्छेदेन तत्र साध्यवृत्तित्वाभाववत्त्वमपि लिङ्गविशिष्टमतो नाव्याप्तिरित्याशयः ननु विशिष्टा
धिकरणत्वे यदि नातिरिक्तं विशिष्टसत्तावानिति प्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः अन्य
था विशेषणाभावनिर्णयदशायामपि विशिष्टसत्ताप्रतीत्यापत्तेः विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रति
बंधकतायाः स्वातन्त्र्येणाकल्पनादित्युच्यते तदाप्याह अनतिरिक्तत्वेऽपीति प्राहुः विशेषणेति शेषणां गुणकर्मा
न्यत्वं विशेष्यं सत्तानयोः सामानाधिकरण्यात्मकसंबंधस्येत्यर्थः साक्षात्संबंधेन तस्य व्यभिचारित्वादाह परंपरये वि
ति अवच्छेदकतारूपस्वरूपसंबंधेनेत्यर्थः सत्त्वगुणकर्मान्यत्वयोर्द्रव्यत्वसामानाधिकरण्यमिति प्रतीत्या अवच्छे
दकतासंबंधेन तदुभयसामानाधिकरण्यस्य द्रव्यत्वसामानाधिकरण्ये सत्त्वान्न व्यभिचार इति भावः नन्वे
वं सत्त्वादिधिकरणघटावच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य घटीयस्वरूपादौ सत्त्वात्तादृशाभावाधिक
रणाभिन्नत्वमस्येव वृत्तेयत्वादिहेतावित्यात् केवलान्वयिन्यव्याप्तिप्रदर्शनमसंगतमित्यत आह केवलेति

१०

द्वितीयापि तत्र साध्यवद्भिन्नत्वस्याप्रसिद्धत्वादिति भावः यथा पीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयि
हेतौ प्रथमलक्षणमतो ऽव्याप्तिः संभवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्येन कत्वविरहेणाऽप्रसिद्धेः न च
घटाद्यवच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः तथा सति घटत्वघटेन वाच्यमिति त्यपि प्रतात्या
पत्तिः तथापि स्वाधिकरणनिरूपितहेतुतावच्छेदकसंबंधेन साध्यवद्भिन्नत्वाभावो ऽत्र लक्षणघटकइत्यभि
प्रायेण द्वितीयाभिधानात् स्वपदस्य तत्तत्साध्यधनव्यक्तिपरतया तादात्म्येन पटा [redacted] त्मकहेत्वधिकर
णीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्यत्ववत्तादात्म्यकत्वाभावस्य पटावच्छेदेन पटत्वादावेवप्रसिद्धेः
वस्तुतस्तु केवलान्व [redacted] यित्वमत्र वृत्तिम
द्धत्वेनाभावप्रतियोगिमात्रं न त्ववच्छेदकगर्भं तथा च तादात्म्येन किंचिदपि प्रमेयं न केवलान्वयि [redacted]
तिद्वितीयस्य लक्षणस्य केवलान्वयिन्यव्याप्तिसंभवाद्यथाश्रुतमेव सम्यगिति ध्येयं। नव्यास्तु केव
लान्वयिनि चाव्याप्तेरिति केवलान्वयिसामान्ये ऽव्याप्तिरभिधाने द्वितीयलक्षणाभिप्रायेणेत्यर्थः

प्रथमलक्षणे यत्किंचित्केवलान्वयिनि तादात्म्ये नभ्रमे। यादि हेतावव्याप्तावपि नक्षतिरित्याहुः॥ सत्तायां गुणे न द्र
व्यत्वसामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्याभावावच्छेदकाभावं गुणेवगाहते
इत्यत्र समानः कारप्रतीतिं दृष्टं तयाति। द्रव्यत्वे गुण इत्यादि। न तु तत्प्रतीतौ गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधि
करण्याभावो विषयः। गुणस्य द्रव्यत्वानाधिकरणतया तन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वसंभवात्॥
किंतु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तदवच्छेदकत्वाभाव एव गुणे विषय इति तद्द्वयमपीतिभा
वः॥ अवच्छेदकत्वाभावमिति। प्रायश्चिकप्रत्ययाभिप्रायेणेदं। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमि
त्यादिशाब्दबोधस्थले अवच्छेदकत्वोपस्थापकपदांतराविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात्
किंतु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणावच्छेद्यमित्याकारएव तत्र बोधः गुणादावित्यत्र सप्तम्य
र्थस्य गुणावच्छेद्यत्वस्य नञर्थेन्वयादित्यध्येयं॥ नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयक
धेत त्वमनुभवसिद्धं। विरु[illegible]सामानाधिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वस्यासिध्या तादृशावच्छेद
श्री कत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिः स्यादत आह। परंपरासंबंधेनेति। निरूपकतारव्यस्वरूपसंबं
धेनेत्यर्थः। न त्ववच्छेदकतारव्यस्वरूपसंबंधेनेत्यर्थः। सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमित्यपि प्र

तीतिप्रसंगात्। सामानाधिकरण्यस्य व्याप्यवृत्तितयाअवछेदतासंबंधेन तस्यासत्वात्। नखिति। तथाच
११ द्रव्यंसत्वादित्योदाव्रति व्याप्तिरितिभावः। ननु उक्तदृष्टांतस्थले बाधकसत्वादवछेदकत्वाभावोस्तु प्रतीतेर्वि
षयः प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वेन। किंचिद्बाधकमस्तीत्यतो बाधकमाह। सत्ता
नेति। तथा यत्र सत्तायां द्रव्यवृत्तित्वावछिन्नाभाववत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्र नस्यादिति
भावः। ननु द्रव्यवृत्तित्वाभावो तद्वद्भेदोप्यव्याप्यवृत्तिरेववाच्यः। तथाच द्रव्यगुणात्मकविभिन्ना
वछेदकावछेदेन सत्तायां तयोर्निवेशात् कुतो विरोध इत्यत आह। द्रव्यवृत्तित्वाभावइति। नन्वे
वं वृक्षे मूले संयोगी नेति प्रतीत्या वृक्षादौ संयोगाभावोपि न सिध्येत् तत्रापि वृक्षनिष्ठसंयो
गावछेदकत्वाभावस्य मूले अवगाहनसंभवादत आह बाधकाभावादिति। संयोगाभा
वो न वृक्षवृत्तिरित्यादिप्रत्ययस्य तत्रासत्वादितिभावः। ननु द्रव्यवृत्तित्वाभावो न
सत्ताव्रतिरिति प्रतीतेरेवासिध्या।। द्रव्यवृत्तित्वाभावो गुणावछेदे ---- ११

न सत्तावत्तित्वरिस्यापि प्रतीत्यात्मकविशेषस्य कर्तुमशक्यत्वादतो दोषांतरमाह अतो द्रव्येति मनस्त्ववदणुत्वादित्यादावित्य
र्थः तत्र अतींद्रियासद्दे तौ ननु प्रत्यक्षासंभवेप्यणुत्वे मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वस्य
त्ववृत् इत्यनुमानादेव तत्र साध्यसामानाधिकरण्याभावसिद्ध्येत्यत आह न चेति तद्वृत्तीति साध्यवद्भिन्नत्वस
त्वर्थः तथा चोक्तानुमाने तद्वृत्तिभिन्नत्वमुपाधिः तस्य च साध्यव्यापकत्वे घटत्वादौ साधनाव्यापकत्वे द्रव्यत्वादौ भा
सिद्धे भेदस्याव्याप्यवृत्तित्वे तु हे साध्यवद्वृत्तितद्वृत्तित्वावच्छिन्नभेदकूटवत्त्वमुपाधिर्बोध्यः ननु कौ साध्यतिसंधान
नादशायां उक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिरत्र भविष्यति अन्यथा व्याप्यंतरस्यापि तत्रातिप्रसंगादित्य
त आह किं चेति इदमित्यादितः पाश्च कालो [illegible] गोमानन्गोत्वादित्यादौ कालिकसंबंधेन हेतावव्याप्तिः तेन संबंधेन
हेतुमति महाकाले तेन संबंधेन कालवृत्तित्वाभावस्य कुत्राप्यसत्वान्न च कालभेदेन गगनादावेव साध्यवद्वृत्ति
त्वाभावस्य प्रसिद्धिः कालस्य गगनाद्यनधिकरणत्वेन ननु तन्निष्ठवृत्तित्वाभावस्य कालावच्छे [illegible] द्यत्वासंभवात् का
लिकसंबंधेन गगनादेर्वृत्तिमत्त्वस्वीकारेप्ययं चापि गोत्वाधिकरणतत्क्षणावच्छेदेन कालवृत्तित्वाभा

१२ वस्यत्व तल्लक्षणसमानाधिकालीनत्व तल्लक्षणोच्चरज्ञाने प्रसिद्धिः तल्लक्षणस्यापि विषयतया स्वविषयकज्ञाना-
धिकरणतया तन्निष्ठतादृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसंभवात् तथापि महाकाल एव कालिकसंबंधेनाधि-
करणं उपाधीनां तु तद्वृत्तितायामवच्छेदकत्वमात्रमिति प्राचां सिद्धान्तमनुरुध्येयं महाकालनिरूपितविशेषणा-
तया वा हेतावव्याप्तिरुद्धर्तव्या इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायां यो विशेषस्तेन हेतुताया-
मिति व्याख्यायां तादृशविशेषणतायाः प्रसिद्धेः सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानु-
पपत्तिरन्यथोपि लक्षणानाक्ता समानकालीनज्ञानस्य विषयतयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्ति-
त्वाभावप्रसिध्यसंभवादिति ध्येयं अत्र हेतुतावच्छेदकसंबंधेन स्वाधिकरणे स्वनिरूपिता हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्ति-
त्वाभावस्य विवक्षायां न कोपि दोषः इति साधनीभूतगोत्वाधिकरणमहाकालाद्यवच्छेदेन गोत्वनिरूपितकालिकसं-
बंधेन साध्यवद्वृत्तित्वाभावस्य घटादेरप्रसिद्धत्वात् साध्यसामानाधिकरण्यलभ्य हृमावच्छिन्नाधिकरणावच्छेदेन हे-
तुवृत्तिकालत्वं तदभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं विवक्षितं इत्ययं च वाच्यं प्रमेयवानित्यादौ प्रमेयव्यक्तीनामे

देपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः केचित्तु स्वनिष्ठं यत्साध्यवद्भिन्नत्वं हेत्वधिकरणावच्छेदेन तदभावाधिकरण
भिन्नत्वमर्थः तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः साध्यवद्भि
न्नाभावाधिकरणत्वसामान्ये यन्निष्ठत्वं यदधिकरणावच्छेदेन घटत्वोभयाभाववत्त्वं व्याप्तिः पर्वतीयरूपादिनिष्ठ
पर्वतीयावच्छेदेन वह्निमत्संयुक्तत्वाभावाधिकरणत्वं [redacted] नतद्भूमनिष्ठं यच्च धूमनिष्ठं तच्च न तद्भूमा
धिकरणावच्छेदेन अधिकरणभेदेनाधिकरणताभेदादन्यथा पर्वते तदीयरूपेण वह्निमत्संयुक्तत्वमिति व
त्पर्वते धूमेन वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यापत्तेः अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः व्याप्यवृत्तेरवच्छे
दकास्वीकारे तु तादृशाधिकरणत्वसामान्ये यदधिकरणावच्छेदेन घटत्वाभाववत्त्वमेवमित्येव वाच्यमित्यादिकं पुनरु
दक्षरत्वादुपेक्षितं वाच्यत्वादिसाध्यके तादृशत्वेन हेतावव्याप्तिश्च वाच्यत्ववत्तादृशत्वाभावाप्रसिद्धेः एतेन सत्ता
यां कर्मणि न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मणीव कर्मसत्तयोः समवायस्याप्यवच्छेदकत्वं भा
सते अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यपि प्रतीत्यापत्तेः एतत्कालस्य कर्मान्नातिरेका
त् एवं च यद्धेतुव्यक्त्यधिकरणेऽपि हेतुतावच्छेदकसंबन्धेन साध्यवद्भिन्नत्वाभावावच्छेदकत्वं नास्ति तत्त्वमर्थः

कालो गोमान् गोत्वादित्यादौ कालत्ववृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वादिनिष्ठतासमवेतत्वादौ प्रसिद्ध
त्वात् गोत्वाधिकरणेप्यकालिकसंबंधेन विरहान्नाव्याप्तिरित्यपि निरस्तमिति संक्षेपः। नन्वीश्वरेच्छारू
पस्य वाच्यत्वस्य गुणत्वादिसमवायित्वात्समवायित्वं न तदधिकरणधर्म इत्यत आह वाच्यत्वमिति अस्या
च्छाद्वारायमर्थो बोद्धव्य इति ईश्वरेच्छाविषयत्वं पदार्थान्तरं वा वाच्यत्वेनानुगतादृशेच्छामात्रे अतिप्रसक्तत्वा
त्तत्त्वेन कस्यापि समवायी। नेति भावः समवायित्वेति मूलस्य समवायिकारणत्वेत्यर्थ इत्याहुः। नन्विदं वाच्य
ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावस्य साध्याभावस्य प्रसिद्धावपि प्रमेयवान् वाच्यत्वादिकेवला
न्वयिनि अप्रसिद्धेरनुद्धारान्मूलस्य न्यूनत्वमत आह प्रमेयेति भावत्वेनेति अभावानामभावः सर्वत्र सुलभ
इत्यन्वयः ननु भावत्वेनाभावो नास्तीति प्रतीतिरभावस्येव अभावत्वेन भावो नास्तीति प्रतीतिः भावस्येव प्र
तियोगित्वमवगाहते न चैतावता प्रमेयमात्रप्रतियोगिकाभावाप्रसिद्धिरत आह वह्नित्वेनेति वह्नित्वेन निर्व
ह्नौ सर्वेषामभावः सुलभ इति योजना ननु जले वह्नित्वेन प्रमेयं नास्तीति प्रतीतिः वह्निमात्रप्रतियोगिकाभाव
मवगाहते न तु प्रमेयसामान्यप्रतियोगिकं वह्निमति तादृशप्रतीत्यनुत्पत्त्या वह्निप्रतियोगिकाभावावगा

हित्वस्याव्यापकत्वादत आह अवृत्तीति तथा च गगनत्वेन प्रमेयं नास्तीति प्रतीत्यैव प्रमेयसामान्यप्रतियोगिका
भावसिद्धिः न हि तत्रापि गगनमात्रप्रतियोगिकत्वं भासत इति शक्यते वक्तुं विनिगमकाभावेन प्रमेयमात्रप्रति
योगित्वावगाहनेबाधकाभावात् कालिकसंबंधेन गगनत्वादिविशिष्टस्य प्रमेयस्य सर्वत्र नाभावः संभवतीत्यु
क्तेः अवृत्तिमात्रवृत्तीति तथा च यादृशसंबंधेन गगनत्वादिर्वृत्तिमद्वृत्तिस्तादृशसंबंधावच्छिन्नप्रतियोगिता
वच्छेदकताको गगनत्वादिना प्रमेयसामान्याभावो वाच्य इति भावः ननु कालिकसंबंधेन प्रमेयसाध्यके तेनैव
संबंधेन साध्याभावस्याप्रसिद्धिः कार्या साच कालिकसंबंधेन गगनत्वेन प्रमेयं नास्तीति प्रतीत्या न संभ
वति तत्संबंधेन गगनादेर्वृत्तिमत्तेनादृशप्रतीतेर्गगनप्रतियोगिकत्वावगाहित्वे ध्रौव्येन तत्र वोपपत्तौ प्रमे
यांतरप्रतियोगित्वे मानाभावादत आह विरुद्धेति तथा च घटत्वपटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या निखिलप्र
मेयप्रतियोगिकस्तत्राप्यभावः सुलभ इति भावः इदमुपलक्षणं संयोगादिसंबंधेन घटत्वादिकमपि प्रमेयाव
त्तीति तत्संबंधेन घटत्वावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोपि बोध्यः अप्रसिद्धिदोषस्यैव सत्वात्

१४

मूले प्रतियोग्यवृत्तीति दोषान्तरं किमित्युपात्तमतस्तदवतारार्थं शंकते नन्विति पारिभाषिकमेवेत्येव का
रणाव्यभिचाराभावो अव्यभिचार इति योगार्थो व्यवच्छिद्यते अव्यभिचरितत्वमिति अथेदं वाच्यमित्यादित्र
य्याभिप्रेतमिति शेषः तथा च नचैव घटरवेत्यादिमूलस्य केवलान्वयिनो व्यभिचारित्वेनालक्ष्यताप्रदर्श
नत्वात् नागतिरिति ध्येयं यदित्यादि अत्र पक्षसमानाधिकरणाइत्यस्यानुक्तौ साध्यव्यापकतावच्छेदकप्रति
योगिताकस्यात्मत्वसामान्याभावस्यापि यावदन्तर्गतस्य व्यापकताघटकसमवायसंबंधेन प्रतियोग्यधिकरणेकेना
पि संबंधेनावृत्तित्वादयमात्मा ज्ञानादित्यादावव्याप्तिरतस्तदुपात्तमित्यग्रे स्फुटं भविष्यति न चात्मत्वाभावो
पि समानकालीनत्वादिसंबंधेन प्रतियोग्यधिकरणवृत्तिः तथाविधसंबंधानां व[illegible]त्यनियामकत्वात् क्व
चिदपि तेन संबंधेन वृत्तिमत्वाप्रतीतेः इत्थं च हेतुसमानाधिकरणत्वमपि हेत्वधिकरणाधेयत्वमात्रं तेना
त्मत्वाद्यभावस्यापि हेत्वधिकरणसंबंधित्वान्नोक्तदोषतादवस्थ्यं नच हेतुसमानाधिकरणाइत्यपहा
यसाध्यसमानाधिकरणयावन्तस्तादृशाभावाः स्वविशिष्टयद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन

प्रतियोगिसमानाधिकरणत्वस्तद्धर्मवत्त्वमित्येवकृतौलक्षणेनकृतमितिवाच्यंद्रव्यमात्मत्वादित्यादौमहाकाशेसा
ध्य[redacted]समानाधिकरणस्यद्रव्यत्वादिसामान्याभावस्यसविशिष्टहेत्वधिकरणाप्रसिध्यातव्याप्त्यप्रसंगात्‌यत्तु
यत्समानाधिकरणत्वंतत्तादृशाभावाःसाध्यसमानाधिकरणाःतत्त्वमित्येवलक्षणमस्तुस्वप्रतियोगिसामानाधिकर
णस्यप्रवेशेबीजाभावइतितुच्छंतथाहियत्समानाधिकरणयावन्तोऽभावाःसाध्यसमानाधिकरणास्तत्त्वमि
त्यस्यैवसम्यक्त्वेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाइत्यस्यपर्यन्तापत्तेःतन्मात्रे
कौविनापिव्याधिकरणधर्मावच्छिन्नाभावेलक्षणासंभवेप्रतियोग्यवृत्तिश्चेत्यादेरवतारकत्वानुपपत्तेःय
द्यपियत्समानाधिकरणाःसाध्यव्यापकतावच्छेदकप्रतियोगिताकायावन्तोऽभावाःदैशिकविशेषणा
तयाभाववृत्तियोतत्वमित्येवास्तुलक्षणेस्वस्यप्रतियोगिसामानाधिकरण्यंतन्भावेगौरवात्‌हेतुस
मानाधिकरणस्यतत्तद्योगोलकान्यत्वाभावस्यैवदैशिकविशेषणतयाभाववृत्तित्वाभावाद्धूमवा
न्वह्नेरित्यादावतिव्याप्तिविरहादितितन्मंदंहेतुसमानाधिकरणस्यवह्निसंयोगाद्यात्मकस्याभावस्य
दैशिकविशेषणतयाभाववृत्तित्वविरहेणवह्निमान्धूमादित्यादावव्याप्तिप्रसंगात्‌नचाभावभिन्नस्यैव

१५

हेतुसमानाधिकरणाभावस्याप्रवेशान्नैषदोषः न च दृष्टभिन्नं घटत्वादित्यादावतिव्याप्तिरापत्तेः न दृष्टभिन्नत्वाभाव
स्य तद्दृष्टरूपरसादिस्वरूपत्वेनाभावत्वात् घटत्वादिना न दृष्टभिन्नत्वाद्यभावस्य चोभयवृत्तित्वादिति अत्र च हे
तुसमानाधिकरणस्ताद्दशाभावास्य प्रतियोगिमत्ताधी विरोधिता घटकसंबंधेन उभयवृत्तेः पक्षत्वमितिक
तेन काप्यनुपपत्तिरित्यलं पल्लवितेन। अत्र यत्पदं यद्धर्मावच्छिन्नपरं अग्रे च यत्त्वमित्यस्य हेतुतावच्छेद
काभूतधर्मवत्त्वमेवार्थः तेन सकल धूमव्यक्त्यननुगततायाः वह्निव्याप्तेर्नोत्ला भः न वा [illegible] नोन्यत्वे सत्त्वा
मनःसंयोगादित्यादौ मनसि हेतुसमानाधिकरणस्यात्मत्वसामान्याभावस्य स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्व
धिकरणाप्रसिद्धिनिबंधनाव्याप्तिः यत्तु द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वाद्य
भावस्याप्रयोजकत्वादव्याप्तिरतो यत्पदस्य यद्धर्मावच्छिन्नपरत्वमिति तन्न द्रव्यत्वाभावस्यापि कालिकादिसंबंधेन स्व
विशिष्टयद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं जन्यद्रव्यत्वादितदवच्छेदेन प्रतियोगिसामानाधिकरण्यात्तत्रा
व्याप्तिविरहात्। साध्येत्यादि साध्यतावच्छेदकावच्छिन्नवह्निष्ठाभावप्रतियोगितानवच्छेदकायद्भावप्रतियोगि
ताता दृशाभावा इत्यर्थः अत्र च विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नाभावस्यैव सत्तास्व १५

रूपसाध्यव्यापकतावच्छेदकप्रतियोगिताकतया तस्य च स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिक
रण्यादिति व्याप्तिरिति साध्यतावच्छेदकावच्छिन्नेति तथा च द्रव्यत्वाद्यभावस्यैव निरुक्तयावदभावान्तर्गतत्वात्तथात्वान्नाति
प्रसंगः साध्यवत्त्वं चात्र साध्यतावच्छेदकसंबंधेन प्रवेश्यं तेन वस्तुमात्रस्यैव विषयतासंबंधेन ज्ञानवत्त्वाद्द्रव्यत्वादि
नावाच्यत्वाद्यभावस्यैव साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वेपि समवायेन ज्ञानस्य साध्यत्वे द्रव्यत्वादिहेतौ नाति
व्याप्तिः समवायसंबंधावच्छिन्नज्ञानवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकस्यात्मत्वाद्यभावस्यैव प्रतियोग्यस
मानाधिकरणत्वात् अत्र च साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन विशेषणीयः तेन साध्यवन्मात्र एव सम
वायित्वावच्छिन्नवाच्यत्वाद्यभावप्रतियोगित्वेन घटाद्यभावस्य सत्वेपि न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदक
प्रतियोगिताकाभावस्याप्रसिद्धिः इत्थं च तत्संबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदको
यो यः तदन्यत्वे सति तत्संबंधावच्छिन्नआधेयतावच्छेदकत्वरूपेण तत्संबंधेन साध्यव्यापकतावच्छेदकत्वं निरुच्यते तादृश
व्यापकतावच्छेदिकायदभावप्रतियोगितातादृशाभावाः प्रवेशनीयाः न च तत्संबंधावच्छिन्नाधेयतेत्यादिकं व्यर्थं

व्यत्वाद्यभावप्रतियोगितायाः अपि संयोगादिसंबंधेन वह्न्यादिव्यापकतावच्छेदकत्वापत्त्या यावदंतर्गतस्पंदव्यत्वाद्यभावस्य
साध्यव्यापकताघटकीभूतसंयोगसंबंधे नप्रतियोगिसामानाधिकरण्याप्रसिध्या सद्धेतुमात्रेऽवासंभवस्य वारणा
र्थं तदुपादानात् संयोगसंबंधावच्छिन्नाभावे यत्व स्यद्व्यत्वादावसत्वेन द्रव्यत्वादिनिष्ठप्रतियोगितस्यतादृशाधेय
तानवच्छेदकत्वात् तत्संबंधेन स्वावच्छिन्नानधिकरणत्वं च तत्संबंधेन स्वावच्छिन्नाधिकरणसामान्ये भेदः तेन वह्न्यादिनि
ष्ठप्रतियोगितावच्छिन्नअधिकरणगगनोभयभेदस्य घटत्वादिनावह्न्यादिनिष्ठप्रतियोगिता वच्छिन्नाधिकरण
भेदस्य च वह्न्यादिसाध्यवति सत्वेपि न क्षतिः अत्राभावादिति स्वरूपकथनं वस्तुतः साध्यवन्निष्ठस्याभावस्य तत्संबं
धावच्छिन्नप्रतियो।गितायाः सामानाधिकरण्येनानवच्छेदकत्वमेव तत्संबंधेन साध्यव्यापकतावच्छेदकत्वं वाच्यं त
त्रे च साध्यवन्निष्ठत्वमभावस्य स्वरूपसंबंधेनैव वाच्यं तेन स्पंदः कालत्वादित्यादौ स्पंदत्वाद्यभावस्यापि कालिक
संबंधेन साध्यवतिवृत्त्या यावदंतर्गतत्वाद्यद्वा व्यत्वाद्यभावस्य चेतादृशस्य प्रतियोगिसमानाधिकरणत्वेपिनाति
नातिव्याप्तिः इत्यं च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगिकस्य जात्यादिस्वरूपस्य हेतुसमाना

धिकरणाभावस्य जातिसामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वादसम्भवापत्तिरतो ऽभावा इत्युक्ताभावभिन्न
इति चार्थः तथा च सामानाधिकरण्येन अनवच्छेदकत्वघटितायां व्यापकतायां न दोषस्तथाभिप्रसे पंच इत्यानेन
व्याप्तौ साध्यतावच्छेदकेत्यादि साध्यतावच्छेदकावच्छिन्नाधिकरणानि यावंति तत्प्रत्येकवृत्तिप्रतियोगिताका इत्यर्थः
नचैकमात्रवृत्तिसाध्यके सद्धेतावव्याप्तिः तत्र यावत्त्वस्यानुपादेयत्वाच्छब्दैकस्याकिंचित्करत्वाद्यद्वा साध्यतावच्छे
दकावच्छिन्नसमानाधिकरणयावंतो धर्माः प्रत्येकं तत्समानाधिकरणवृत्तिप्रतियोगिताका इत्यर्थ इत्याहुः यत्तु साध्य
वत्त्वस्याभावप्रतियोगितावच्छेदकप्रतियोगिताकेत्यर्थ इति तन्न केवलान्वयिसाध्यकसद्धेतौ तादृशप्रतियोगित्वाप्र
सिद्ध्याव्याप्तिः गगनस्वरूपाभावस्य तादृशत्वेपि हेतुसमानाधिकरणत्वासंभवादिति अत्रव्यापकतावच्छेदकप्रति
योगिताकेत्यत्र व्यापकताया अवच्छेदो यया तत्ति बहुव्रीहौ कप्रत्ययः तेन प्रतियोगितया अनवच्छेदकस्य समासेको
पपत्तेपि पुंवद्भावः न ह्यत्र कोपधस्यैव पुंवद्भावनिषेधादित्यभियुक्ताः सर्वत्रेति सद्धेतावसद्धेतौ चेत्यर्थः
तथा च यावत्त्वानुक्तावपि व्याप्तिरेव स्यान्नाव्याप्तिरिति भावः सकलव्यभिचारिणी इत्यर्थ इत्यन्ये केचित्तु सर्व

तेति सकलहेत्वधिकरणावच्छेदेनेत्यर्थ इत्याप्याहुः वाच्यत्वाद्यभावस्येति घटत्वादिना वाच्यत्वाद्यभावस्येत्यर्थः तथात्वा
१८ त्प्रतियोगिसमानाधिकरणत्वात् तथा च धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थमेव यावत्पदमिति भावः ननु साध्यता
वच्छेदकव्यापकप्रतियोगिताकयावदभावोक्तैव वाच्यत्वाद्यभावमादायोक्तस्यातिप्रसंगस्य व्युदाससंभवात्सा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादाने गौरवं स्वस्तमत आह अ
त्रैवेति निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः अन्यथा भूतत्वाद्यभावस्य साध्यतावच्छेदकव्यापकप्रतियोगिक
ताकान्यत्वाद्भूतत्वमूर्तत्वोभयत्वाद्यवच्छिन्नाभावस्य च तादृशप्रतियोगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन
प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः स्यादेवेति भावः यत्तु साध्यप्रतियोगिको यत्किंचिदभावो यद्धर्मावच्छि
न्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणः तद्धर्मवत्त्वमित्येवास्तु लक्षणं कृतं यावद्धर्मे निरुक्ताधू
मवान्वह्नेरित्यादौ घटत्वेन धूमाभावस्यैव तादृशस्य हेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वात् अति
व्याप्तिव्युदासादित्याशंक्य अन[illegible]त्वादिकमवतारयति तेनु — च्छे तादृशशंकापां धूम[illegible]वान्वह्नेरि

त्वादिप्रसिद्धस्थलएव वह्नि[illegible]धूमोभयत्वाद्यवच्छिन्नाभावमादायातिव्याप्तिसंभवेभूतत्वा[illegible]तोभयवा
नित्याद्यनुधावनस्यासेद्धर्मविरोधापत्तेः यदपि ननु यादृशाभावस्य प्रतियोगितायाः व्यापकं साध्यतावच्छे
दकं तादृशः कश्चित् भावो यद्धर्मावच्छिन्नाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणः तद्धर्मवत्त्वं
व्याप्तिरित्युक्तौ च वाच्यत्वाद्यभावमादायातिव्याप्तिवारणसंभवाद्यावद्धर्मलक्षणांगौरवग्रस्तमत उक्तं
ज्ञातएवे[illegible]त्यादीति तदप्यसंगतं प्रतियोगिमात्रस्यैव प्रत्येकपर्यवसितत्वेन वह्निधूमोभयत्वादेः साध्य
पकत्वासंभवात् वह्निधूमोभयवान्धूमादित्यादावव्याप्तिभयेन तादृशानिरुक्तेः शंकितुमशक्यत्वा
त् ननु प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोग्यधिकरणत्वं साध्यनिरूपितसाध्यतावच्छेद
कसंबंधेन ग्राह्यमित्यलं यावत्त्वनिवेशेन इत्यत आह ज्ञात[illegible]एवेत्यादीत्यवदंति नव्यास्तु साध्यताव
च्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताको यत्किंचिदभावो यदधिकरणाव
साध्यतावच्छेदक संबंधेन च्छेदेन तादृशप्रतियोगिताश्रयसमानाधिकरणस्तत्त्वमित्यस्यैव सम्यक्त्वे यावत्त्वा धर्मलक्षणारंभो

गौरवग्रस्तः प्रमेयवान्वाच्यत्वादित्यादौ गगनाद्यवच्छिन्नप्रतियोगिताकविरुद्धघटत्वपटत्वोभयावच्छि
१८ न्नप्रतियोगिताकं च प्रमेयाभावमादायैव लक्षणासंभवात् गगनादेर्वृत्तिमत्त्वलक्षणधर्मत्वाभावात् सा
मान्याभावीयान्यप्रतियोगित्वं च स्वरूपसंबंधेन प्रत्या अयं विभिन्नमतो गगनावच्छिन्नप्रमेयमा
त्रस्याभावमादाय धूमवान्वह्नेरित्यादौ नातिप्रसंगः न चानवच्छिन्नत्वान्तवैयर्थ्यं वह्निधूमोभयत्वावच्छिन्ना
भावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तेर्वारकत्वात्साध्यनिष्ठपदमपि तदर्थमेव अन्यथा गगनाद्यवच्छि
न्नप्रतियोगिताकवाच्यत्वाद्यभावमादाय व्यभिचारिमात्रे अतिव्याप्त्यापत्तेरत आह अत एवेति द्रव्यं च मूर्त
त्वविशिष्टमूर्तत्वाद्यभावस्य साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नप्रतियोगिताकतया तत्प्रतियोगिसामा
नाधिकरण्ये नातिव्याप्तिं संपादयतीत्याशयेन द्रव्यत्वावच्छिन्नाभावपर्यन्तस्य प्रतियोगिसामानाधिकरण्य
अभिधानमपि साधु संगच्छते परंतु प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिकः कश्चिदभावो यदधिकर
णावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्वमेव व्यभिचरितत्वं कुतो नोक्तं भूतत्वमूर्तत्वोभयत्वावच्छि

न्नप्रतियोगिताव्यक्तेः तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेवतादृशोभयाभावमादाय व्याप्तिव्याप्त्यसंभवा
वि दितिभावनीयमिति प्राहुः केचित्तु साध्यतावच्छेदकावच्छिन्नपदस्य व्यर्थतया साध्यव्यापकतावच्छेदकप्रतियोगिताकाभाव
एव यावत्त्वविशेषणमुचितमत आह ज्ञातएवेति निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः इति प्राहुः ननु मूर्त्तत्वमात्मभिन्न
त्वे सति विशेषगुणवत्त्वं तच्च न व्यापकतायाः प्रतियोगिवैयधिकरण्यघटितत्वकल्पे भूतत्वमूर्त्तत्वोभयस्य व्यापकं तादृ
शोभयवति घटादावुत्पत्तिक्षणावच्छेदेन विशेषगुणत्वाद्यवच्छिन्नाभावसत्त्वादत उक्तं मनोन्यत्वेति साध्यस्यैवाभावा
मादाय नातिव्याप्तिः सुतरां तु वक्ष्यते तस्येति वै मुक्तिकन्यायेनोक्तं मनोन्यत्वेपात्तमपि वदंति ज्ञातयात्वादिति स्वाश्रवि
शिष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वात् मनस्येव व्यभिचारादित्यर्थः ननु यत्समानाधिक
रणयावंतः अभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नत्वादिकं व्य
र्थं न च साधनसमानाधिकरणगोत्वाद्यभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादसं
भव इति वाच्यं तस्यापि पूर्वक्षणावृत्तित्वविशिष्टस्याभावात्मकप्रतियोगिसमानाधिकरणत्वात् न चैवं गो

व्यभिचारिणापाति व्याप्तिरिति वाच्यं अभावस्य स्वसमानाधिकरणधर्मावच्छिन्नस्वकीयप्रतियोगिताश्रयसमा
१९ नाधिकरणं तदन्यप्रतियोगितायाः एव व्याप्यवृत्तिता निरूपकतया धूमाद्यभावस्य पूर्वक्षणावृत्तित्वविशिष्टस्वा
भावनिष्ठप्रतियोगितायाः अतथात्वेन धूमवान्वह्नेरित्यादावतिव्याप्त्ययोगादत आह साधनेत्यादि गोत्वादीत्या
दिपदेन गगनादिसंग्रहः तथा च तदनुक्तावसंभवस्यादिति भावः नन्वेवं यत्समानाधिकरणाः यावन्तः साध्यप्रतियोगि
काभावाः साध्यतावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणाः तत्त्वमित्येवोच्यतां तावतैव गोत्वाद्यभावमादायासंभव
स्य व्युदासादत आह तत्तदिति तथा चोक्तविवक्षायां द्रव्यत्वाद्येकव्यक्तिसाध्यकसद्धेतौ लक्षणासंभवे पि वह्निमान्धू
माज्जातिमान् सत्त्वादित्यादौ साध्यप्रतियोगिकानां तत्तद्व्यक्त्यभावानां मातृत्वाद्यभावानां च प्रतियोग्यसमानाधि
करणत्वाद्व्याप्तिरिति भावः न च साध्यव्यापकप्रतियोगिका इत्यस्यैव सम्यक्त्वे व्यापकतावच्छेदकप्रतियोगिताकत्व
पर्यंतं व्यर्थमिति वाच्यं तत्तत्साध्यव्यक्तीनां गगनादीनां च प्रमेयत्वादिप्रकारेण साध्यव्यापक
तया तदभावमादायासंभवापत्तेः न चैवं स्वानधिकरणसाध्यवन्निष्ठाभावप्रतियोगित्वेन साध्यव्यापकं सं

ॐ इतिमयेसाति ततेजात्वे

निरुच्यते स्वप्रतियोगिकाभावएव निवेश्यतामिति वाच्यं तस्य लक्षणांतरत्वे प्युक्तलक्षणास्यादुष्टत्वादिति भावः यत्स
मानाधिकरण इत्यत्र हेत्वधिकरणत्वं विशिष्टं येनेत्यादिना तदधिकरणमिति तत्संबंधात्यर्थः तेनतादात्म्येनाधिकरणा
प्रसिध्याव्याप्तितत्संबंधेन सद्धेतौ नाव्याप्तिः अत एवालेपाति प्रतियोग्यधिकरणवृत्तित्वविरहे पात्यर्थः यद्यपि प्रतियोगिसामा
नाधिकरणं स्वविशिष्टहेत्वधिकरणावच्छेदेन आत्मविवक्षणीयं तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणानुक्तौ
कालिकसंबंधेन धूमस्याधिकरणे महाकाले वर्तमानस्य प्रलयाद्यन्यत्वाद्यभावस्यापि प्रावदंतर्गतत्वात् स्वविशिष्टहेत्वधि
करणाप्रसिध्या वह्निमान्धूमादित्यादावव्याप्तिः संभवति तथापि स्वविशिष्ट हेत्वधिकरणेत्यादेरुक्ताव
नुक्तावुभयथापि अप्रमात्मारणानादित्यत्राव्याप्तिः वह्निमान्धूमादित्यत्र तु स्वविशिष्टत्वाद्युक्तावेव तथेत्याशयेन प्र
सिद्धोदाहरणं परित्यक्तं यत्तु महाकालस्यैव प्रलयाद्यन्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसंभवात् स्वविशिष्टत्वाद्युक्ताव
पि वह्निमान्धूमादित्यत्र नाव्याप्तिः महाकालस्य हेतुताघटकसंयोगसंबंधेन धूमाधिकरणत्वाभावेपि हेतुसंबंधि
त्वानपायात्तादात्म्येन हेतोः संग्रहार्थं हेतुतावच्छेदकसंबंधेन यो हेतुसंबंधस्तद्वृत्तियावदभावानामेव निवेश्यत्वादि

तिमत्तत्तुच्छं संयोगमात्रेण धूमहेतोः प्रभामेडलादौ वह्निव्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुता
४० त्तादृशसंयोगेन च धूमस्याधिकरणे पर्वतादौ प्रलयत्वादिस्वरूपस्य प्रलयान्यत्वाद्यभावस्य वैशिष्ट्याप्रसि
द्धेः आवश्यकत्वाद्भिन्नकालानयोर्विषयतान्यसंबंधसामान्येनैव आधाराधेयभावविरहादिति दिक् ननु पृथिवी
त्ववान् महाकालकपालान्यतरत्वादित्यादावतिव्याप्तिः साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि हेत्व
धिकरणमहाकालावच्छेदेन कालिकसंबंधेनैव प्रतियोगिसमानाधिकरणत्वादत आह एवमिति दलान्तरेपि प्रति
योगिसामानाधिकरण्यपदलेपीत्यर्थः एकसंबंधेन व्यापकत्वमन्यसंबंधेन प्रतियोगिसामानाधिकरण्यमित्येवसं
बंधभेदनिबंधनः प्रोक्तातिव्याप्तिरूपो दोषः साध्यव्यापकताघटकसंबंधेन सा प्रतियोगिसामानाधिकर धं
ण्यघटकसंबंधस्यैक्याविवक्षया निरसनीय इत्यर्थः यत्संबंधेन स्वावच्छिन्नाधिकरणसाध्यवन्निष्ठा
भावप्रतियोगितावच्छेदकं यद्यत्तदन्यप्रतियोगिताकः साध्यवन्निष्ठाभावीय्य यत्संबंधावच्छिन्नप्रतियोगि
तासमानाधिकरणावच्छेदकान्यप्रतियोगिताको वा यो अभावः तस्य तादृशसंबंधेन [redacted]

[redacted] प्रतियोगिनो यदधिकरणं तद्वृत्तित्वं विवक्षितमि
ति फलितार्थः पृथिवीत्वाद्यभावप्रतियोगित्वं तु न कालिकसंबंधेन पृथिवीत्वादिव्यापकतावच्छेदकं नित्यपृथिव्यां
व्यभिचारात् किंतु समवायेनैव तेन च संबंधेन पृथिवीत्वाद्यभावस्य हेत्वधिकरणमहाकालावच्छेदेन प्रतियोगि
सामानाधिकरण्याभावान्नोक्तातिव्याप्तिरिति भावः यत्तु येन संबंधेन व्यापकत्वं तेन प्रतियोगिसामानाधिकरण्यो
क्तावपि नित्यज्ञानं ईश्वरसविषयकत्वादित्यत्रातिव्याप्तिः साधनसमानाधिकरणस्य घटाभिन्नत्वाद्यभावस्या
पि साध्यव्यापकताघटकविषयितासंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसमानाधिकरणत्वात् तच्च येन येन सं
बंधेन व्यापकत्वं तेन तेन संबंधेन प्रतियोगिसामानाधिकरण्यविवक्षणान्नोक्तदोषः तथा सति यावत्पदवैयर्थ्याप
त्तेः विशेषणतासामान्येनैव साध्यवन्निरूपितविशेषणतयापि वाच्यत्वादेस्साध्यव्यापकतया घटत्वादिनाव्या
प्यत्वाद्यभावस्यैव तादृशसंबंधेन हेत्वधिकरणावच्छे प्रतियोगिसामानाधिकरण्यविरहाद्धूमवान्वह्नेरित्या
देन

त्वादिव्यभिचारिण्यतिव्याप्त्यसंभवादिति तन्मतं विषयितासंबंधेन व्यापकताया एव सर्वत्रासत्वाद्विषयितासंबंधेन
२१ स्वावच्छिन्नाधिकरणत्वाप्रध्या स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायास्तेन संबंधेनासंभवा
न्न च तेन संबंधेन स्वावच्छिन्नसंबंधित्वमेव व्यापकतायां निवेशनीयं त्वदुक्तातिव्याप्तिभयेनैव तस्यानिवेशना
प्यत्वान्न च तत्संबंधावच्छिन्नायाः साध्यवन्निष्ठाभावप्रतियोगितायास्सामानाधिकरण्येनानवच्छेदकधर्म
वत्त्वलक्षणं व्यापकत्वं विषयितासंबंधेन सुलभं साध्यवतो नित्यज्ञाने वस्तुमात्रस्यैव विषयितासंबंधेन संबंधित्वेपि
नित्यज्ञानान्यत्वविशिष्टघटादेर्विषयितासंबंधेनाभावस्यात्र सत्वे बाधकाभावादिति वाच्यं विषयितायाः वृत्त्यनि
यामकतया तत्संबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः यद्यपि मनस्त्ववान् परमाणुत्वादित्यत्रातिव्याप्तिः परमाणुत्व
समानाधिकरणस्य मनस्त्वाद्यभावस्यापि साध्यव्यापकताघटकदिक्कृतविशेषणतया सर्वत्रैव परमाणोर्दिक्कृत
प्रतियोगिसमानाधिकरणत्वादिति तदपि तुच्छं नित्यानामव्यावर्तकत्वात् जन्यानामेव मूर्त्तानां दिगुपाधि

२२

ताभावमादायैव केवलान्वयिसाध्यकस्थले लक्षणासमन्वयात्प्रतियोग्यवृत्तित्वेत्यादिमूलस्य दूषकत्वानुपपत्तेः न च
साध्यवन्निष्ठाभावीयप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वरूपव्यापकतायां व्यधिकरणधर्माव
च्छिन्नाभावमादायासंभव वारकस्य सामानाधिकरण्येनेत्यस्य व्यर्थतायामेव तन्मूलग्रंथस्य तात्पर्यमिति वाच्यं
सामान्यधर्मेण विशेषस्याभावमादाय व्यापकत्वाप्रसिद्धेर्वारणार्थमेव सामानाधिकरण्यपदस्य व्यापकतायाम
वश्यं निवेशनीयत्वादिकं विभाव्यते न रा संबंधैक्यविवक्षयेति तन्मते पक्षे साध्यव्यापकत्वस्य तदवच्छेदकप्रतियोगि
त्वस्य प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वे स्वैकसंबंधावच्छिन्नत्वविवक्षयेत्यर्थः तथा च
स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः स्वप्रतियोगिता
वच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभात् यावदंतर्गतसमवायादिसंबंधेन नित्यत्वेन त्वमन
त्वस्पंदत्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतसमवायादिसंबंधेन यावद्धेत्वधिकरणे प्रतियोग्यसमानाधि

तया परमाणौ दिक्कृतविशेषणतया कस्याप्यसत्वात्तेन संबंधेन साध्यव्यापकत्वविरहादन्यथा वस्तुमात्रस्यैव
कालोपाधित्वसंभवात्तदपि जन्यमात्रस्य न स्यादत एव प्रलयदशायां दिग्देशविभागो नास्तीत्यपि सिद्धांतसंगच्छते अन्य
था परमाणूनां सत्वात्तदानीमपि दिग्व्यवहारकप्रसंगादिति दिक् यदि च स्पंदो महाकालत्वादित्यादावतिव्याप्तिः साधनसमा
नाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि साध्यव्यापकता घटककालिकसंबंधेन महाकाले प्रतियोगिसमानाधिकरण
त्वान्न च स्पंद इत्याकारकयत्किंचि[illegible]द्दोषव्यक्तेर्विषयतासंबंधेनैव स्पंदत्वव्यापकत्वाद्यावदेतद्गतस्पंद[illegible]दभावस्यैव सा
ध्यव्यापकता घटकविषयतासंबंधेन हेत्वधिकरणे महाकाले प्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिः न हि तादृशव्य
क्तेः कालिकसंबंधेनापि स्पंदत्वव्यापकत्वं भाविभूतस्पंदेषु व्यभिचारादिति वाच्यं विषयतायाः क्षणसमानकालीनतया
तद्बुद्धिव्यक्त्यभावदशायामेव स्पंदत्ववत्ति विषयतासंबंधेन तद्बुद्धिव्यक्त्यभावसत्वाद्विषयतासंबंधेन स्पंद इत्याकारक
जन्यबुद्धेः साध्यव्यापकत्वासंभवात् किं च व्यधिकरणधर्मावच्छिन्नाभावस्यासत्वेपि व्यधिकरणसंबंधावच्छिन्नत्ववाच्यत्वात्

करणता [redacted] न्निरूपितानंतिरूपसविषकत्वान्मनस्त्ववान्यरमाणुत्वात् संदोमहाकालत्वादित्यादौनकुत्राप्यतिव्या
प्तिः नचैवं वाच्यं तत्रैयत्वादित्यादावव्याप्तिः व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्यैवतत्र घटकतया स्यप्रति
योगितावच्छेदकसंबंधसत्वेमानाभावादिति वाच्यं स्वरूपसंबंधेन घटत्वादिनावाच्यत्वंनास्तीतित्यादि प्रतीत्यनु
रोधेनतादृशाभावस्यप्रतियोगितावच्छेदकसंबंधस्वीकारात् अन्यथाभूतले संयोगेनप टत्वावच्छिन्नघ
टवदित्येवनिर्णयसत्वेपि भूतले संयोगेन घटत्वेन पटोनास्तीति प्रत्ययापत्तेः नचैवमपसिद्धांतः व्यधिकर
णधर्मावच्छिन्नोपिचेदभावः प्रामाणिकस्तथासर्वसंबंधैस्तत्प्रतियोगिता अवच्छिद्यतामितिग्रंथकृतैव
सामान्याभावेवक्ष्यमाणत्वात् केचित्तु संबंधे कपविवक्षयैतस्यसाध्यत्वे साध्यव्यापकत्वे प्रतियोगित्वं
प्रतियोगिसमानाधिकरणपघटकीभूतप्रतियोग्यधिकरणत्वं चैकेनसाध्यतावच्छेदकसंबंधेन वि
वक्षणीयमित्यर्थः तथाच साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यव्यापकीभूततादृशसंबंधावच्छिन्न
प्रतियोगिताकायावंतो अभावाः साध्यतावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणाद्दत्यर्थलाभा

न्नकुत्राप्यतिव्याप्तिः न च प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यं तदनुक्तौ
२३ वाच्यत्वादिभेदमादायैव केवलान्वय्यादावलक्षणासंभवे प्रतियोग्यवृत्तित्वेत्यादिमूलेतन्निराकरणस्यासंगतत्वापत्तेः
न चैवमपि सर्वत्र वाच्यत्वाद्यभाववस्येत्यादिग्रंथविरोधः वाच्यत्वादेस्संयोगादिसंबंधेन धूमाद्यभाववद्व्यापकत्वादि
ति वाच्यं वाच्यत्वाद्यभाववस्येत्यत्रादिपदस्त्वाद्यत्रस्वरूपसंबंधेन साध्यतात्र वाच्यत्वाद्यभावमादायसंयोगादि
संबंधेन साध्यतायां द्रव्याद्यभावमादायातिव्याप्तिपरं तथैव तत्संगतिरित्याहुः तन्न इदं मनोन्यत्वाद्यभाववस्येत्वत्रग्रं
थविरोधाद्भूतत्वमूर्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्संबंधेन साध्यव्यापकत्वासंभवात् व[illegible]त्य
नियामकसंबंधेनाधिकरणत्वस्य प्रतियोगित्वस्य चासिध्या तेन संबंधेन साध्यतायां धनी चैत्रत्वादित्यादौ स
द्धेताव व्याप्तिः तद्रूपान्यरूपं रूपत्वादित्यादावतिव्याप्तेश्च साध्यताघटकसमवायसंबंधेन साध्यव्यापकताव
च्छेदकप्रतियोगिताकानां व्यधिकरणधर्मावच्छिन्नगुणत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिकरणा
वच्छेदेन प्रतियोगिसामानाधिकरण्यादिति यत्तु विशेषणताविशेषेण साध्यव्यापकत्वे तेनैव च प्रतियोगि

त्वेप्रतियोगिसामानाधिकरण्यंच संबंधैक्यविवक्षयेत्यस्यार्थमाहुः तादृशपि गवाद्यभावस्यात्मत्वाभावस्येत्यादिग्रंथ
स्यालग्नकत्वापत्तेरुपेक्षितं नन्वेतावता अयमात्मा ज्ञानादित्यादौ अव्याप्तिरेव घटत्वादिनात्मत्वाभावस्यापि स्वविशिष्टस्यकुत्रो विषयता
याधिकरणे घटादौ व्यापकताघटकसमवायेनप्रतियो गिसामानाधिकरण्याभावदत आह दलांतरे पातितपक्षाद्युक्तहेत्वधिकर
णावच्छेदेनेत्यत्र हेत्वधिकरणेइत्यर्थः संबंधभेदनिवेशनो दोषः एकसंबंधेन हेत्वधिकरणत्वेस्वविशिष्टहेत्वधिकरणे
त्यत्रान्यसंबंधेनहेत्वधिकरणत्वनिवेशनो अ[illegible] व्याप्तिरूपो दोषइत्यर्थः संबंधैक्यविवक्षयेतिहेतुसंबंधेनेति विवक्षयेत्यर्थे इ
त्यंच दलांतर पदमपि साधु संगच्छते इति नव्याः यदा धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमसामान्याभावस्यापि हेत्वधिकरणायोगो हे
लक अवच्छेदेन स्वप्रतियोगित्वस्य कालिकसंबंधेना श्रयीभूतवह्न्यादेः सामानाधिकरण्यादत आह दलांतरे पातितप्रतियो
गिसामानाधिकरण्यमित्यत्र प्रतियोगिताश्रयदले पात्यर्थः संबंधभेदनिवेशनो दोषः प्रकृतसाध्यव्यापकत्वस्यैकसंबंधाव
च्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यान्यसंबंधावच्छिन्नप्रतियोगिताश्रयी भूतवह्न्यादेस्सामानाधिकरण्यनि
वेशनो दोषः संबंधैक्य विवक्षायायत्संबंधेन व्यापकतावच्छेदकत्वंप्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यमित्यत्रापि

तेन संबंधेन प्रतियोगिताश्रयत्वविवक्षया उक्तार्थ इति संक्षेपः ॥ अत्र संबंधैक्याविवक्षायां रूपसामान्याभाववान् पृथिवीत्वाज्ज-
न्यपृथिवीत्वादित्यादि विरुद्धहेतावप्यतिव्याप्तिः साधनसमानाधिकरणस्य पृथिव्यान्यत्वाद्यभावस्यापि हेत्वधिकरणपृथि-
व्यवच्छेदेन जन्यपृथिवीव्यवच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसमानाधिकरणत्वान्मूर्तमात्रस्य दिगुपाधित्वान्न चे-
त्स्यात्स्थले नो रूपमित्याकारकयत्किंचित्प्रमाव्यक्तेः विषयतासंबंधेन साध्यव्यापकत्वाद्यावदंतर्गतस्य च तदभावस्यैव
हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः तादृशबुद्धिव्यक्तेर्भिन्नकालीनघटादौ केनापि
संबंधेनासत्त्वादिति वाच्यं विषयतया ज्ञानसमानकालस्यापि तया तादृशबुध्यभावदशायामेव रूपशून्ये गगनादौ वि-
षयतासंबंधेन तद्बुध्यभावप्रतियोगितावच्छिन्नाभावसत्त्वात्तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदकप्र-
तियोगिताकत्वाभावात् स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायाः तद्बुद्धिव्यक्तौ सत्त्वेपि प्रतियोगिवै-
य्यधिकरणघटितव्यापकत्वस्य तद्बुद्धिव्यक्तौ सत्त्वेनोक्तस्थले अतिव्याप्तेरावश्यकत्वादिति भ्रमं निराकरोति रूपसामा-
न्याभावेत्यादिना पृथिवीत्वादिकमिति नित्यपृथिव्यादिगुपाधित्वे मानाभावादादिपदं तेन जन्यपृथिवीत्वाद्युपग्र

हःसद्धेतुत्वप्रतिकूलत्वंविरोधंनिरस्यतिप्रलयइतिमहाप्रलयइत्यर्थःखंडप्रलयेतुपार्थिवपरमाणौरूपस्यैवअन्यथोत्तरसगौ
पार्थिवद्व्यणुकस्यरूपोत्पत्त्यर्थंपरमाणौपाकांतरकल्पनापत्तेरितिप्राचःप्रलयइत्यस्यपाकेनरूपादेःप्रलयदशायामित्यर्थःते
नमहाप्रलयानभ्युपगमेपिनक्षतिःउत्पत्तिकालेचेत्यत्रेयाकारेणानिरुक्तप्रलयस्याप्यनुकर्षणाच्चअवयविन्यपिपाकदशायां
तत्सत्तयानगंधन्यूनताइत्यपरेननुविरोधविरहेपिघटाद्यवच्छेदेनव्यभिचारित्वात्कुतःसद्धेतुत्वमतआहउत्पन्नातियद्यपि
पाकेनश्यामादिरूपनाशकालेपिअवयविनिरूपसामान्याभावसत्त्वेतथापिवीलुपाकमतेतदसंभवाद्दपच्यमानावयव्यनु
रोधाच्चोत्पत्तिकालमात्रानुसरणंतत्सत्त्वादितिरूपादिसामान्याभावसत्त्वादित्यर्थःप्रतियोगिवदितिप्रतियोगिनइवेत्यर्थःवि
रोधित्वंएकदेशाकदेशावृत्तित्वेमानाभावादितिप्रलयाद्यवच्छेदेनपरत्वादौरूपादिसामान्याभावेतुयोग्यसन्निकर्षाभा
वात्प्रत्यक्षासंभवेप्यनुमानमेवमानमस्त्वित्याशयःयत्तुउत्पत्तिकालावच्छेदेनरूपसामान्याभावस्यप्रत्यक्षमेवसंभ
वतितदानींचक्षुस्सं[illegible]युक्तविशेषणतायाःतत्रासत्त्वेपिद्रव्यसमवेतवृत्त्यभावप्रत्यक्षहेतोश्चक्षुस्संयुक्तसमवेतविशेष
णतायाःसत्त्वेनसन्निकर्षसंवादितितत्तुच्छंचक्षुःसंयुक्तसमवेतद्व्यणुकविशेषणतायारूपाद्यभावचाक्षुषापत्त्याच्च
क्षुस्संयुक्तयोग्यसमवेतविशेषणतायाएवाभावग्राहकत्वेनद्रव्यान्यद्रव्य[illegible]समवेतवृत्त्यभावचाक्षुषत्वेनैवतज्ज्ञा

२५

न्यतावच्छेदकत्वात् अन्यथा त्रसरेणुवृत्त्यभावचाक्षुषे व्यभिचारापत्तेरिति। वस्तुतः श्यामोत्पत्तेः पूर्वं चक्षुस्संयुक्तसमवेत
स्य घटादेरसत्त्वात्तद्विशेषणतया अपि तदानीमसत्त्वाद् रक्तरूपे राहे तु तत्त्वेन निर्देश इति ध्येयं अत एवेति ध्वंसप्रागभावयो रत्यन्ता
भावविरोधित्वेनाभावादेवेत्यर्थः रक्तिम ध्वंसप्रागभावयोस्सत्त्वमावेदयितुं अन्तरायदं रक्तं रूपमिति न च गुणे शुक्लादयः पुं
स्यनुशासनाद्रक्तो रूपमित्येव प्रयोगो युक्त इति वाच्यं वस्त्वन्तरविशेषणाभावापन्नस्यैव शु(क्)लादिशब्दस्य नेनपुंसकत्वानुशास
नादतएव शुक्लं रूपमिति प्रयोगः समासे मणिकृतैव वक्ष्यमाणत्वादिति ध्येयं एषः रक्तं रूपं नास्तीति प्रत्ययः पूर्वं त्वादि पूर्वरक्तस्य ध्वं
सवत्युत्तर रक्तस्य प्रागभाववति इदानीं रक्ते पात्यर्थः न च रक्ततादशायां वर्तमानस्यापि रक्तोत्तर ध्वंसादेस्तदानीं रक्तत्वावच्छि
न्नप्रतियोगिताकत्वविरहान्न तादृश प्रत्ययः तस्याव्याप्य वृत्तित्वादिति वाच्यं ध्वंसादिप्रतियोगित्वस्य किंचिद्धर्मानवच्छेद्यत्व
त्वात्तदनंतध्वंसप्रागभावादिषु रक्तत्वाद्यवच्छिन्न प्रतियोगिताकत्वकल्पनामपेक्ष्य रक्तत्वाद्यवच्छिन्न प्रतियोगिताकात्यंता
भावसंबंध स्यैव अन्तराश्यामादिषु कल्पनायां लघुत्वाच्चेन च यावंति रक्तोरूपाणि तत्तद्व्यक्तित्वेतरधर्मानवच्छिन्नत्ता
त्तद्व्यक्तिनिष्ठ प्रतियोगिताका भावैरेव रक्तं रूपं नास्तीति प्रत्ययः क्रियते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभा
वस्यासत्त्वान्न तथा प्रतीतिः इति वाच्यं तथा सत्यंतराश्यामे रक्तं रूपं नास्तीत्याकारकनिर्णयेऽपि तत्र रक्तरूपमस्तीति

प्रत्ययापत्तेः विरोधिनस्सामान्याभावस्यानिश्चयाद्विशेषाभावकूटनिर्णयस्याप्रतिबंधकत्वात् ॥ अन्यथा सामान्याभा
वानवसिध्येदिति भावः प्राचस्तु प्रतियोगितासंबंधेन रूपत्वमात्रावच्छिन्नप्रकारताकसंसर्गाभावविशेष्यकप्रत्ययो रूपत्वाद्यवच्छिन्नप्रकारता
कबुद्धेर्विरोधीति रूपत्वं प्रतियोगितावच्छेदकमेव नेति श्यामतादशायां रूपत्वावच्छिन्नाभावस्वरूपं नास्तीति प्रतीतेर्न विषयः किमनुरोधे
न रूपध्वंसादिमति तदत्यन्ताभावसिद्धिरित्याहुः अत्रोत्तरण्यामे समवायेन रक्तं रूपं नास्तीति प्रतीतेः प्रामाण्यानुरोधाद्ध्वंसात्यन्ताभा
वयोर्न विरोधः अन्यथा समवायावच्छिन्नप्रतियोगिताकध्वंसाद्यप्रसिध्या तत्प्रतीतेर्भ्रमत्वापत्तेः इति तु परमार्थः तत्सामानाधिकरण्यं
चेति प्रतियोगिसामानाधिकरण्यं चेत्यर्थः स्वविशिष्टेति स्वपदं साध्यव्यापकतावच्छेदकप्रतियोगिताकतत्तदभावव्यक्तिपरं तथा च
तत्तदभावाश्रयीभूतं यद्धेतुताघटकसंबंधेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तदवच्छेदेन तत्तदभावप्रतियोगिसमानाधि
करणं यन्नास्तीत्यर्थः तेन हेतुसमानाधिकरणस्य घटत्वादिनावच्छिन्नाद्यभावस्य कालिकादिसंबंधेन धूमाद्यधिकरणस्य सत्त्वेऽव्या
पकताघटकसंयोगादिसंबंधेन प्रतियोगिसामानाधिकरण्याभावेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः न वा द्रव्यं विशिष्टसत्त्वादि
त्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणगुणाद्यवच्छेदेन प्रतियोग्यसमानाधिकरणत्वेपि न क्षतिः गुणादीनां विशिष्टसत्त्वा
नधिकरणत्वात् यद्यपि व्याप्यवृत्तेरवच्छेदके माना भावाद्वाच्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यं तदवच्छे

दकत्वं नहेत्वधिकरणस्यत्यसंभवः कथमिति नातिव्याप्तितादवस्थ्यं नच स्वविशिष्टहेत्वधिकरणतानिरूपकीभूतप्रतियोग्यधिकरणता
२६ वच्छेदकत्वं वाच्यं स्वविशिष्टपदव्यर्थतापत्तेः प्रतियोग्यधिकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ चद्रव्यमेतच्छ
त्वादित्यादावव्याप्तिः यावद्धेत्वधिकरणाप्रसिद्धेः तथापि यावंतो हेत्वधिकरणवृत्तिधर्माः हेत्वधिकरणत्वानि वा यावंतिः तत्सत्वे कात्स्न्य
यीभूतप्रतियोग्यधिकरणावृत्तित्वस्य विवक्षितत्वादेकत्वादेकमात्रवृत्तिहेतोरपि नक्षत्रा वृत्तित्वविशिष्टस्य वह्न्याद्यधिकरणत्वानि संग
तिनातत्राव्याप्तिः नच प्रतियोग्यव्यधिकरणवृत्तित्वविशिष्टस्वविशिष्टयावद्धेत्वधिकरणतावत्त्वमात्रं सम्यक् हेतुसमानाधिकरण
इत्यस्य स्वविशिष्टेत्यस्य वैयर्थ्यापत्तेः प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेदेनेत्यस्य प्रवेशाय क्रमपर्यवद्भवनात्यन्तः पक्षा
द्रुक्तस्यापि तस्य प्रथमं प्रयोजनमाह तेनेति गोत्वादिनागवाद्यभावस्य तत्कालिकवृत्तावपि यदा गोत्वं तदा गौरित्यादौ नातिप्रस
ङ्ग इति योजना इदमुपलक्षणं तत्तद्रूपावच्छिन्नाकाल्पत्वाभावस्यापि कालेप्रतियोगिसमानाधिकरणत्वाद्धूमवान्वह्नेरित्यादाव
तिप्रसंगो द्रष्टव्यः गवाद्यभावस्य प्रतियोग्यधिकरणे दैशिकसंबंधेनापि वृत्तिमुपपादयन्नाह गवाद्यनधिकरणेति इदानीं
चत्वरे गौर्नास्तीति प्रत्यया उक्तमत्यपि कालेकालिकसंबंधावच्छिन्नगवाद्यभावस्यानधिकरणचत्वराद्यवच्छेदेन वृत्ती
नविरोधः नचैवं तत्वयस्य चत्वरवृत्तित्वावच्छेदेन गवासंताभावविषयइतिवाच्यं देशेवृत्तौ कालस्यैव कालेवृ

त्तौदेरास्याप्यवच्छेदकत्वानुभवादेकशेषस्य कर्त्तुमशक्यत्वादिदानीं गगने गोनास्तीति प्रतीतेर्गवाभावस्य तत्कालाव
च्छेदेन गगनवृत्तित्वावगाहितायां भ्रमत्वापत्तेश्च गवाद्यभावस्य गगनादौ सार्वदिकत्वेन व्याप्यवृत्तितया कालावच्छेद्य
त्वासंभवादिति भावः तद्दूनातिगवादिमतात्पर्यः कालेजन्यकाले ननु चरमध्वंसात्मकस्य प्रलयात्यंताभावाभावस्यापि या
वदंतर्गतत्वात्तस्य च सृष्टिकालिप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरत आह महाकालेति तथा च तस्यापि म
हाकाले प्रतियोगिसामानाधिकरण्यं तस्य कालिकसंबंधेन जगदाधारत्वादिति भावः ननु गोत्वादिजातेः प्रलये कालि
कसंबंधेन सत्वे प्रमाणाभावाद्यदा गोत्वं तदा गौरिति सद्धेतुरेवेति यदि ब्रूयात्तदाप्याह यत्र कालत्वमिति उक्तवि
वक्षानाररे घटादिसाधारणरूपेणापि गोस्साध्यतायां प्रतिव्याप्तिरित्याशयेन साध्यांतरमाह जन्यद्रव्यमिति द्र
व्यत्वेन साध्यतायां कालत्वसद्धेतुरेव प्रलयेपि कालिकसंबंधेन परमाणावादेस्सत्वात् कार्यद्रव्यानधिकरणभूतत्वेस
तिद्रव्यवत्वेनैव धर्मिग्राहकप्रमाणेन तत्सिद्धेरतो व्यभिचारत्वसंपत्तये जन्यपदं ननु महाप्रलयानंगीकारे प्रागुक्तं
हेतुद्वयं लक्ष्यमेव खंडप्रलयेपि ब्रह्मांडांतरे जन्यद्रव्यसत्वादतस्साध्यांतरमाह प्रलयावृत्तिवृत्तिखंडप्रलया

वृत्तिवेत्यर्थः यद्यपि प्रतियोगिनो यदधिकरणांतद्वृत्तित्वस्यैव दैशिकसंबंधेन विवक्षायामपि यदा गोत्वं तदा गोरित्यादा
२८ वतिव्याप्तिवारणसंभवति प्रलयावृत्तित्वाद्यवच्छिन्नाभावस्य स्वप्रतियोग्यधिकरणे महाकालादौ दैशिकसंबंधेन वृ
त्तिविरहात् न च द्रव्यं महाकालत्वादित्यत्राव्याप्तिः कालिकसंबंधेन महाकालनिष्ठस्य द्रव्यत्वाभावस्य स्वप्रतियोग्य
धिकरणे दैशिकविशेषणतया वृत्त्यभावादिति वाच्यं हेतुसमानाधिकरणत्वस्यापि तादृशविशेष तया विशेष
णीयत्वात् तथापि रूपभिन्नं गुणत्वादित्यादौ साधनसमानाधिकरणस्य रूपान्यत्वाद्यभावस्य रूपभिन्नत्वप्र
कारकप्रमाविशेष्यत्वाद्यभावस्य च रूपत्वादिस्वरूपतया तस्य दैशिकविशेषणतासंबंधेन वृत्तित्वविरहेणाव्यावर्त
नतया त्वाद्धटत्वादिना रूपभिन्नत्वाद्यभावस्य सर्वस्यैव तादृशाभावस्य महाकालादौ स्वप्रतियोगिसमानाधि
करणत्वादतिव्याप्तिरतः स्वविशिष्टहेत्वधिकरणेत्यादि विवक्षानुसरणमिति वदंति वस्तुतः दैशिकविशेषणतान
वघटितस्य लक्षणेन रत्वा [redacted] देकेनापि रूपाकर्तुमशक्यत्वाद्रक्तलक्षणेन वैयर्थ्यं इति ध्येयं य
त्तु हेत्वधिकरणवृत्तित्वप्रवेशे पि गोरवात् सर्वत्र व्यभिचारस्थलान्यत्वाद्यभावमादायातिव्याप्त्यापावादिति तन्न

च्छेदेखवृत्तित्वविशिष्टानां केवलान्वयिधर्माणामत्यंताभावस्य स्वप्रतियोग्यवृत्तित्वेनासंभवापत्तेः नहि वाच्यत्वादिवृत्ति
त्वविशिष्टानां वाच्यत्वादीनामभावो वाच्यत्वादिरूपप्रतियोगिवृत्तिरिति दिक् प्राचांमते संयोगसामान्याभावसाध्यके
प्रमेयत्वं द्रव्यत्वं वा व्यभिचारात्पतः कपिपदं प्रतियोगिवैयधिकरण्यघटितमेव साध्यव्यापकत्वमत्र निवेशितं यथा संनि
वेशवैयर्थ्यविरहात् तस्तदवच्छेदकत्वं संयोगाभावनिष्ठप्रतियोगित्वे प्रसक्तमित्याशयेन संयोगात्मकाभावस्याभिधानं तद्
घटितसाध्यव्यापकतायाः प्रवेशे तु गगनत्वादिविशिष्टस्य वाच्यत्वाद्यभावस्याभावादेर्गगनत्ववाच्यत्वोभयत्वावच्छिन्नाभा
वादेर्वा यावदंतर्गतत्वात्तस्य हेत्वधिकरणाभूतगगनावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरतः स्वविशिष्ट
पदं एतदभिप्रायेणैव संयोगाद्यात्मकाभावस्य सत्त्वादिपदं उपात्ते व[illegible]ः सत्तावान् द्रव्यत्वात् गुणत्ववान् रूपत्वादि
त्यादौ कालेजन्यरूपे च हेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्य च केनापि संबंधेन आत्मगगा
नादौ नित्यरूपे च अवृत्तित्वाद्धेत्वधिकरणावच्छेदेन तस्यैव यावदंतर्गतस्य प्रतियोगिसामानाधिकरण्यविरहाद्व्याप्तिः
स्यात् यदि स्वविशिष्टपदं न स्यादिति दिक् [illegible]नु धूमाद्यभावनिष्ठो जलादिवृत्तित्वविशिष्टस्य गोत्वाद्यभावस्याभा

वो धूमाद्यभाववत्त्वाभावप्रतियोगिकस्याभावाधिकरणस्याधिकरणस्वरूपत्वात्तथा च धूमादौ साध्ये वह्न्यादिहेतौ अति
व्याप्तिः धूमाद्यभावस्य हेत्वधिकरणावच्छेदेनैव गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादत आह जलवृत्तीति न च
२८ तादृशाभावस्य धूमाभावस्वरूपत्वेपि जलादेर्न तादृशाभावत्वावच्छिन्नाधिकरणत्वं किं तु धूमाभावत्वावच्छिन्नाधिकरण
त्वमेवेति न प्रसक्त्यातिप्रसंग इति वाच्यं एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगादुक्तक्रमेणोवातिप्रसंगस्य वारणसंभवा
दिति भावः नन्वेवं तथापि धूमवान्वह्नेरित्यादावतिव्याप्तिः समनियताभावानामैक्याद्धूमाभावस्य वह्निधूमोभयाभावाद
भिन्नस्यायोगोलकान्यत्वाभावादेश्चायोगोलकभेदत्वादिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणावच्छेदे
नैव वह्न्यादिभेदात्मकप्रतियोगिसमानाधिकरणत्वादिति चेदत्राहुः यावत्त्वस्य फलतः प्रतियोगिताविशेषणत्वेन सा
ध्यव्यापकतावच्छेदकीभूतयद्यत्प्रतियोगिताकोऽभावः तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रय
सामानाधिकरण्यं विवक्षितं तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगिताकस्य धूमादिनि
ष्ठप्रतियोगिताश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः नन्वेवं

यसमानाधिकरण इत्यस्य वैयर्थ्यमितिवाच्यं आत्मत्वसामान्याभावीयप्रतियोगिताया अपि साध्यव्यापकतावच्छेदक
तयात्तत्प्रतियोगिताकस्यात्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहादयमात्माज्ञानादित्यादौ अ
व्यभिचारकत्वात् जलवृत्तित्वविशिष्टेत्यादिग्रंथस्य तु संगतिमनुरुध्यैवोक्तं तेन तादृशाभावस्य धूमाभावस्य स्वरूपत्वेपित
स्यहेत्वधिकरणावच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्यविरहादेव अतिव्या
प्त्यसंभवेपि नासंगतिः नच धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामा
न्यनिष्ठं प्रतियोगित्वं लाघवात् न तु प्रतियोगित्वांतरं गौरवादित्युक्तौ विवक्षया व्यप्रतीकार इति वाच्यं स्वरूपसंबंधव्याप्ति
कायाः प्रतियोगितायाः सामान्याभावस्थले प्रतियोगिभेदेनैव भिन्नत्वादिति सांप्रदाकाः वस्तुतः साध्यव्यापकतावच्छेदिकायाः स्व
न्यूनवृत्तिधर्मानवच्छिन्नायाः यादृशप्रतियोगिता निरूपको अभावस्तत्स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्र
तियोगिताश्रयसामानाधिकरण्यमेव वक्तव्यं तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावानति
रेकेचतदीयां प्रमेयसामान्यनिष्ठं प्रतियोगित्वं स्वन्यूनवृत्तिनैव धूमत्वादिधर्मेणावच्छिन्नमतो न तादृशप्रतियोगिता

२६

अथ सामानाधिकरण्यमुपादाय नातिप्रसंग इति युक्तमुत्पश्यामः यत्तु समनियताभावे कथमतो धूमवान्वह्नेरित्यादावतिव्याप्तिवारणा
र्थं येन येन संबंधेन साध्यव्यापकता प्रसेकं प्रतियोगिसामानाधिकरण्यं विवक्षितं तथा च व्यभिचारमात्र एव यत्राधिकरणे व्यभिचा
रस्तदन्यत्वस्य स्वात्मकस्वरूपसंबंधेनापि साध्यव्यापकत्वात्तदभावस्य च हेत्वधिकरणावच्छेदेन तादृशान्यत्वस्वरूपस्वरूपसंबंधे
न स्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः अत एव विषयितासंबंधस्य व्यापकताघटकत्वेपि नित्यज्ञानं नित्यसवि
षयकत्वादित्यादौ नातिव्याप्तिः नित्यज्ञानत्वाद्यभावस्य व्यापकताघटकीभूतेन समवायसंबंधेनैव प्रतियोग्यसमानाधिकरण
त्वादिति मंतव्यं नतु घटं घटत्वादित्यादिना वाच्यत्वाद्यभावस्यैव घटत्वादिनायःपिंडान्यत्वाभावस्वरूपतया तस्य च व्यापकेन अयःपिंडा
न्यत्वनिरूपितसंबंधेन यावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यविरहादेव धूमवान्वह्नेरित्यादावतिव्याप्तिविरहाच्चावं
त इत्यस्य स्वविशिष्टत्यस्य यत्समानाधिकरण इत्यस्य च व्यर्थतापातादिति दिक् ननु व्यधिकरणधर्मावच्छिन्नाभावस्वेपि
सद्धेतौ गगनत्ववाच्यत्वोभयाद्यभावं गगनत्वादिविशिष्टस्य गगनाद्यभावस्य वा अभावमादाय प्रोक्तलक्षणासंभवात् प्रतियो
ग्यवृत्तित्वेत्यादिमूलावतारानुपपत्तिः न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगितायावि

शेषणायत्वाद्वैवमितिवाच्यं व्यभिचारकत्वेन तादृशविशेषणस्य व्यर्थत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नाभाव
कालीनत्वेन हेतुविशेष्यशिष्ट्यैव ग्रंथावतरणं कृतो न समर्थयेदतो लक्षणांतरमाह यत्समानाधिकरणानामित्यादि व
ह्निमान् धूमात्सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यव्यापकप्रतियोगिकानां जलत्वविशिष्टद्रव्यत्वाभावगुणत्वविशि
ष्टसत्ताद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वाद्यवच्छिन्नसामाना
धिकरण्याभावादत उक्तं रूपावच्छिन्नेति तथा च जलत्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकतानवच्छेदकत्वाद्दोषः यत्तु
साध्यव्यापकप्रतियोगिकस्य घटत्वेन वह्न्यभावस्य यावद्धेत्वधिकरणे घटत्वाद्यवच्छिन्नसामानाधिकरण्याभावाद्व्यापक
तावच्छेदकरूपावच्छिन्नेति तदयं तमसत् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभाववत्यात्तद्व्याप्ययावद्धेतुमन्निष्ठप्रतियोगिताव
च्छेदकीभूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात् समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात् तदवच्छिन्नवाच्यत्वाभा
वस्य च मूलोक्तस्यैतल्लक्षणाघटकत्वादाह वाच्यत्वत्वादिनेति विशेषणमित्यादियेन संबंधेन हेतुस्तेन हेतुतावच्छेदका
वच्छिन्नहेत्वधिकरणावृत्तित्वमेव अभावे ग्राह्यं तेनायमात्मा ज्ञानात् अन्यत्वे सत्यात्मघटसंयोगादित्यादावात्मत्वसा

मान्याभावस्यातथात्वेपिनाव्याप्तिः एवंयेनसंबंधेनव्यापकतातत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यस्वप्रतियोगिता
३० वच्छेदकसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यंबोध्यं अतोनव्यधिकरणधर्मावच्छिन्नाभावस्यासत्वे
पिव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादायलक्षणान्वयसंभवात्प्रतियोग्यवृत्तीत्यादिग्रंथावतरणानुपप
त्तिः नवाजलत्वादेस्समवायेनसाध्यतायांमहाकालत्वादावतिव्याप्तिः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं
चस्वविशिष्टहेत्वधिकरणावच्छेदेनबोध्यं तेनद्रव्यंसत्वादित्यादौद्रव्यत्वाद्यभावस्यकालेहेतुमतिप्रतियोगिसमा
नाधिकरणत्वेपिनातिव्याप्तिः इदंत्ववधातव्यंसाध्यवन्निष्ठाभावप्रतियोगितायाःसामानाधिकरण्येन अनवच्छे
दकत्वरूपमेवव्यापकत्वावच्छेदकत्वमत्रलक्षणेप्रवेश्यंनतुप्रतियोगितैव्यधिकरणधर्मघटिततथासतिव्यधिकरण
धर्मावच्छिन्नाभावासत्वेपिप्रमेयमित्याकारकजन्ययत्किंचिद्बुद्धिविषयत्वसामान्याभावमादायैवसर्वत्रलक्षणा
न्वयसंभवात्प्रतियोग्यवृत्तीत्यादिग्रंथावतारानुपपत्तिः तज्ज्ञानविषयत्वस्यतादृशज्ञानदशायामेवसत्वेनतद्दस
त्वदशायामेवतादृशज्ञानविषयत्वाभावस्यहेतुसमानाधिकरणत्वात् एवंचात्रस्वविशिष्टपदंनकपिसंयोगाद्यात्मका

भावं गगनत्वादिविशिष्टस्य वाच्यत्वाद्यभावस्याभावमुपादाय कपिसंयोगाभाववान् प्रमेयत्वादित्यादौ अव्याप्तिवारकं कपिसं
योगाभाववत्वादेरुक्तव्यापकतावच्छेदकत्वात् किंत्वनुमितिकाले वर्तमानस्य सत्वसामान्याभावस्यापि निरुक्तरूपेणालि
त्वात् तस्य चात्मादावसत्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात् सत्तावान् द्र
व्यत्वादित्यादौ अव्याप्तिवारकमेव स्वविशिष्टपदं न च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नप्रतियोगि
ताकाभावो यद्धेत्वधिकरणावच्छेदेन स्वाव[illegible]च्छेदकसंकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणस्तत्वमित्ये
व सम्यक् वाच्यत्वत्वादिना घटघटाभावमादायैव वाच्यं ज्ञेयत्वादित्यादौ लक्षणासमन्वयादिति वाच्यं स्वरूपसंबंधेन प्रमेयत्वा
वच्छिन्नाभाव अप्रसिध्या प्रमेयवान् ज्ञेयत्वादित्याद[illegible] व्याप्ते[illegible] गुरुधर्मावच्छिन्नप्रतियोगित्वा[illegible] प्रसिध्या प्र
मेयवह्निमान् धूमादित्यादावव्याप्तिः वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकतया गोमान् चैत्रत्वादित्यादौ स्वामि
त्वादिसंबंधेन गवादेः साध्यतायां अव्याप्तेश्चेति दिक्। ननु वह्नि[illegible]त्वेन धूमवद्वृत्तिसामान्याभावो धूमे [illegible]संबंधेन द्र संयो
व्यसामान्याभावो वा धूमाभावस्य [illegible] त पात्र[illegible]योगात्वभेदः तदभाववान्यतरत्वेन प्रयोगोलकानां अ

वृत्तेरभावो ऽयोगोलकान्यत्वाभावरूपवत्समनियताभावानामेकतया च धूमाद्यभावस्य प्रतियोगितावच्छेदकं यद्वह्नित्वा
दिकं तदवच्छिन्नेनैव समं यावद्वह्न्यधिकरणे धूमाद्यभावस्य प्रतियोगिसमानाधिकरणत्वात् धूमेव वह्नेरित्यादावतिव्या मका
प्तेः सामान्यधर्मेण विशेषाभावाभ्युपगमे तु सुतरां तथा धूमत्वेन धूमाद्यभावानामपि वप्रमेयत्वादिना धूमाभावतया तस्य च स्व ना
३१ प्रतियोगितावच्छेदकीभूतप्रमेयत्वाद्यवच्छिन्नसमानाधिकरणत्वादिति चेन्न अत्रापि यावत्त्वफलतः प्रतियोगित्वस्य विशेष
न णतया साध्यव्या[illegible]पकतावच्छेदकरूपावच्छिन्नयत्प्रतियोगिताको यत्समानाधिकरणोऽभावः स्वविशिष्टहेत्वधिकरणा
वच्छेदेन तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणास्तत्त्वं पर्यवसितार्थः तथा च धूमादिनिष्ठतादृशधूमत्वाद्य
वच्छिन्नप्रतियोगिताकाभावस्य धूमादिनिष्ठं यत्प्रतियोगित्वं तदवच्छेदकीभूतधूमाद्यवच्छिन्नेन सार्धं हेत्वधिकरणाव
च्छेदेन सामानाधिकरण्यविरहान्नातिप्रसंग इति संप्रदायः वस्तुतो ऽत्रापि साध्यव्यापकतावच्छेदकरूपाव[illegible]च्छि
न्नया स्वन्यूनवृत्ति धर्मानवच्छिन्नया यादृशप्रतियोगितया निरूपितो ऽभावस्तादृशप्रतियोगितायाः पर्यवच्छेद
कं तदवच्छिन्नसामानाधिकरण्यं वक्तव्यं धूमत्वादिना धूमाद्यभावस्य च प्रमेयत्वादिना धूमाद्यभावः सामान्य

धर्मेणाविशेषाभावस्यानभ्युपगमात्तदभ्युपगमे तु यादृशप्रतियोगिताकाभावे तादृशप्रतियोगितावच्छेदकावच्छिन्नवृत्तित्व
स्य जगद्वृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकानां तादृशप्रतियोगिताव
च्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यमतो न कश्चिद्दोष इति ध्येयं चक्रवर्तिलक्षणमाह केचित्त्विति अनवच्छेदकमिति य न्या
त्साध्यतानवच्छेदकमिति परेणान्वितं घटत्वादिना वह्न्याद्यभावमादाय वह्निमान् धूमादित्यादौ लक्षणासंगतिः व्यभिचारिणि
तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः कपिसंयोग्येत
त्त्वादित्यादावव्याप्तिवारणाय व्याप्यवृत्तीति वह्नित्वादिना घटाद्यभावमादाय व्याप्तिरतस्साध्येति अत्र च प्रतियोगिता
साध्यतावच्छेदकसंबंधेन ग्राह्या तेन समवायादिसंबंधेन वह्न्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वे
पि वह्नित्वादेर्नासंभवः प्रतियोगिवैयधिकरण्यप्रवेशे वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः प्रतियोगिव्यधिकरणसाध्याभा
वाप्रसिद्धेः अतस्तत्परित्यागः व्याप्यवृत्तित्वं तु निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वं हेत्वधिकरणे यत्किंचिद्वृत्तिव
त्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तित्वं तत्त्वं वा एवं चैतल्लाभार्थमेव हेतुसमानाधिक

रणस्येत्युक्तंनतुस्वातंत्र्येणतद्विशेषणंवैयर्थ्यात्यत्किंचित्त्वनिवेशाच्चकपिसंयोगाभावस्यहेत्वधिकरणीभूतद्रव्यनिष्ठाभाव
३२ प्रतियोगित्वेपिसंयोगीसत्त्वादित्यादौनातिव्याप्तिः ननुसमनियताभावानामैक्यमतेघटत्वेनवह्न्यभावस्यैववह्नित्वेनघटा
भावतयाहेतुसमानाधिकरणस्यतादृशस्यैवसाध्याभावस्यप्रतियोगितावच्छेदकंवह्नित्वादिकमित्यव्याप्तिरतस्समनियताभावै
क्यमतेपिनिरुक्तिमाह हेतुसमानाधिकरणस्येति व्याप्यवृत्तेरभावस्यप्रतियोगितायास्सामानाधिकरण्येनानवच्छेदकंय
त्साध्यतावच्छेदकमितियोजना नन्वत्रापिहेतुसमानाधिकरणस्यवह्नित्वेनवह्निधूमोभयाभावस्यवह्नित्वेनपर्वतावृत्तेर
भावस्यचप्रतियोगितायास्समानाधिकरणंसूदेववह्नित्वमवच्छेदकमित्यव्याप्तिः तादृशप्रतियोगितायाः अन्यूनवृत्तित्वे
सतियदवच्छेदकंतदन्यत्वोक्तावपितथापिवैनैर्हेवह्नित्वेनतार्णतार्णोभयंनास्तीतिप्रतीतिसिद्धस्यैवतादृशाभावस्यप्रति
योगितावच्छेदकत्वाद्वह्नित्वस्यनचैतादृशाभावप्रतियोगितावच्छेदकत्वंनवह्नित्वमात्रेपर्य्याप्तंकिंतुतार्णतार्णोभयत्वेपि
अन्यथातादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवतिपर्वतादौतादृशाभावासत्त्वप्रसंगादितिवाच्यं सौउत्तमतेप्र
तियोगितावच्छेदकधर्मावच्छिन्नवत्तामात्रस्याभावाविरोधित्वादन्यथाघटवतिघटत्वेनपटाभावस्यापलापापत्तेः किं

तु प्रतीतिबलाद्व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्मविशिष्टप्रतियोगितावच्छेदकाव
च्छिन्नेनैव सा धर्मेणा स्यात् अभावस्य विरोधित्वं वाच्यं तदेतद्वह्नित्वादिनानुगमितागोभयाभावसत्वेपि न क्षतिकरं अत एव द्रव्य
त्वेन वह्निर्नास्ति वह्नित्वेन न वह्निर्नास्तीत्यादिप्रतीत्या सामान्यधर्मेणापि विशेषाभावोऽभ्युपेयते न च तत्र वह्नित्वस्यैव प्रतियो
गितावच्छेदकत्वं भासते द्रव्यत्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यं वह्निमान्नयमित्येवं निर्णयसत्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्र
त्यया द्रव्यत्वस्यैवावच्छेदकतया भा[illegible]नादन्यथा वह्नित्वावच्छिन्नवह्निष्ठप्रतियोगिताकत्वप्रकारेण वह्न्यभावस्यैव वह्नित्वेन वह्निमत्तानि
श्चयस्य प्रतिबन्धकत्वात्तादृशप्रतीत्यसम्भवापत्तेः अस्माकं तु द्रव्यत्वावच्छिन्नवह्निष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति द्रव्यत्वे
न वह्नित्वविशिष्टनिश्चयस्यैव विरोधित्वात्तदसत्वादेव तादृशाभावप्रतीतिसम्भवादित्यतो लक्षणान्तरमाह प्रतियोगिव्यधिक
रणस्येति केचित्तु सामानाधिकरण्यमभेदस्तथा च हेतुसमानाधिकरणाभावीयत्वाभिन्नप्रतियोगितायाम् अवच्छेदकं य
त्तदन्यत्वं साध्यतावच्छेदके विवक्षितं प्रतियोगित्वं हि स्वरूपसंबन्धविशेषः स च सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरू
पमेव न तु प्रतियोगित्वरूपः अननुगमात् आधाराधेयभावानुपपत्तेश्च सामान्यधर्मेण विशेषाभावस्थले च प्रतियोग्यंशे

प्रकारीभूतो विशेषधर्मोऽवच्छेदको न तु सामान्यधर्मः अतिप्रसक्तत्वात् व्यधिकरणधर्मावच्छिन्नाभावस्थले तु प्रतियोगितावच्छेदका
३३ दिस्वरूपं न प्रतियोगित्वं किं त्वतिरिक्तमेव अन्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनैव सार्धमभावस्य विरोधित्वात्त
दवच्छिन्नवृत्तिताद्दशाभावस्यासत्त्वप्रसंगाद्द्वितीयाद्यपि व्यतिरिक्तायां प्रतियोगितायामेव अन्यथा समनियताभावैक्येन नि
खिलव्यधिकरणधर्मावच्छिन्नाभावस्यैव गगनात्मकतया गगनाभावत्वाकारेण तदनंगीकारानुपपत्तेः इत्थं च वह्नित्वेन प (चिंतामणिकाराणां)
र्वते गतो गोत्वेन वह्निर्नास्तीति प्रतीतिबलात्ताद्दशाभावप्रतियोगितावच्छेदकत्व[redacted]स्य वह्नित्वे सत्त्वेपि ताद्दशप्रतियोगित्वं वह्नि न
स्वरूपं त्वावच्छिन्नं किं तु ताद्दशोभयत्वावच्छिन्नमतिरिक्तमेवेति स्वाभिन्नायास्साधनवन्निष्ठाभावप्रतियोगितायाः यदवच्छे
दकं तदन्यत्वस्य वह्नित्वे सत्त्वान्नास्य धूमव्यापकतावच्छेदकत्वहानिः नन्वत्र लक्षणे हेत्वधिकरणवृत्तित्वमभावस्य संबं
धमात्रेण न वाच्यं वह्निसामान्याभावस्यापि कालिकादिसंबंधेन धूमवति सत्त्वाद् व्याप्त्यापत्तेः नापि दैशिकविशेषणत
य याघटभिन्नं द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः घटत्वस्वरूपस्य साध्याभावस्य विशेषणतया वृत्तिविरहादित्यतो लक्षणान्तर त्व
माह प्रतियोगिव्यधिकरणस्येत्यादिना प्रागुक्तव्याप्यवृत्तित्वं यत्किंचित्त्वघटितत्वेन दुर्वचमतः प्रतियोग्यव्यधिकरणस्य

केचित्तु २

तिलक्षणांतरमुक्तमित्यप्याहुः हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायास्सामानाधिक
रण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना। अत्र प्रतियोगिव्यधिकरणत्वं न प्रतियोगिसमानाधिकरणभिन्नत्वं स
मानिपताभावानामभिन्नतया घटत्वेन घटाद्यभावादेरपि घटत्वेन प्रमेयसामान्याभावस्वरूपत्वात्तस्य च प्रमेयात्मकप्रतियो
गिसमानाधिकरणतया तदन्यत्वासंभवात्। अतएव प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणो यो यस्तदन्यत्वमपि न
तथा घटत्वेन घटाद्यभावादेरेव प्रमेयत्वादिना घटाद्यभावस्य द्रव्यत्वेन घटादेर्वृत्तेरभावस्य वातादात्म्योपगमात् प्रसिध्यापत्तेः व्यधि द
करणधर्मावच्छिन्नाभावस्यापि तत्तद्वारणासंभवे सामानाधिकरण्येन त्यस्य वैय्यर्थ्यापाताच्च। न च साध्यतावच्छेदकसंबं
धेन यादृशप्रतियोगिताश्रयानधिकरणं तादृशप्रतियोगित्वं यत्प्रतियोगिता र्थः। तथा च वह्नित्वेन घटाभावीयं घटनिष्ठ तं
प्रतियोगित्वमपि तादृशमेव तदवच्छेदकत्वं वह्नित्वेप्यस्तीति सामानाधिकरण्यपदं तेन तादृशप्रतियोगितायास्समा
नाधिकरणावच्छेदकाप्रसिध्या तद्भिन्नप्रतियोगितेव लक्षणघटकेति वाच्यं विशिष्टसत्तावान् जातेरित्यादावतिव्याप्ते
गुणादीनां विशिष्टसत्तानिष्ठप्रतियोगिताश्रयाधिकरणत्वात्। घटवान् महाकालत्वादित्यादौ अव्याप्तिप्रसंगाच्च। हेतुम

तोमहाकालस्यसाध्यताघटकंकालिकसंबंधेनघटाद्यभावप्रतियोगिताश्रयाधिकरणतयाप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यापत्तेः
३४ रिति चेत् अत्राहुः साध्यतावच्छेदकसंबंधेनस्वाश्रयवृत्तिस्वावच्छेदकधर्मावच्छिन्नाधिकरणायावद्वृत्त्यधिकरणिकायावदभावप्रतियोगि
तासादन्यप्रतियोगित्वंप्रतियोगितांतार्थः तथाचवह्नित्वेनघटाद्यभावस्यापिघटादिनिष्ठप्रतियोगितातादृशीतितदवच्छेदकत्वं व
ह्नित्वेप्यस्तीत्यतःस्सामानाधिकरण्यपदं घटवान्महाकालत्वादित्यादौतुगगनाभावीयंगगननिष्ठमेवतादृशप्रतियोगित्वं सु
लभमितिनकोपिदोषः वस्तुतोधूमवतिवह्नित्वेनघटोनास्तीतिवद्धूमवान्वह्नित्वेनघटवान्नकिंतुघटत्वेनेतिप्रतीतिबलात्व्य
धिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकोप्यन्योन्याभावोस्ति अतएवसमवायितयावाच्यत्ववद्भेदोघटादौप
क्षधरमिश्रैः स्वीकृतः तथाच यादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधेनयादृशप्रतियोगिताश्रयाधिक
रणान्यत्वंहेतुमत्तस्तादृशप्रतियोगितासमानाधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकत्वाभावत्वं
साध्यतावच्छेदकेपिविवक्षितंतथाचघटादिनिष्ठस्यवह्नित्वेनघटाद्यभावप्रतियोगित्वस्यापितादृशत्वेनवह्नित्वादेस्तदवच्छेद
कत्वाद्व्याप्तिरतःसामानाधिकरण्यपनेस्तुक्तं तथाच वह्नित्वस्यतादृशप्रतियोगितावच्छेदकत्वेपितादृशप्रतियोगिसमानाधि

करणवृत्तित्वरूपव्यधिकरणधर्मेण तादृशप्रतियोगितानवच्छेदकत्वाभावस्य तत्र सत्त्वान्नाव्याप्तिः कालो घटवान् महाकालत्वादित्यादौ
तु घटादिसामान्याभावप्रतियोगितायाः तत्रातथात्वेपि घटत्वेन पटाद्यभावप्रतियोगितामादायैव लक्षणसंगतिः कालः पटत्वेन पटवा
न्न तु घटत्वेनेत्यनुभवात् वह्नित्वादिसामान्यधर्मेण महानसीयवह्न्याद्यभावसत्वे तु यादृशप्रतियोतागितावच्छेदके यत्त्वावच्छेदक
त्वमनतिरिक्तवृत्तित्वरूपं ग्राह्यं तच्च तदतिरिक्तवृत्तित्वसतित तत्सामानाधिकरण्यं यच्च तदन्यत्वं नातो व्यधिकरणधर्मावच्छिन्नप्र
तियोगितायास्तत्र एव एव वारणसंभवे सामानाधिकरण्यपदलवैयर्थ्यमित्यस्मद्गुरुचरणाः यत्तु यत्प्रतियोगितावच्छेदकविशिष्ट
स्य यत्प्रतियोगिताश्रयस्य च द्वयोस्साध्यतावच्छेदकसंबंधेनानधिकरणं तादृशप्रतियोगित्वं प्रतियोगिताकार्थः तथा च वह्नित्वेन घटा
द्यभावस्य घटनिष्ठप्रतियोगिताया आश्रयपि तादृशत्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतस्सामानाधिकरण्यपेनेति प्रागुक्ता
र्थकं एतन्मते च सामान्यरूपेण विशेषाभावानभ्युगमः नातो वह्नित्वेन तद्व्यक्त्यभावमादायाव्याप्तिः न च स्वरूपसंबंधात्मकप्रतियोगि
तायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान्धूमादित्यादौऽव्याप्तिः वह्निसामान्याभावीयं यन्महानसीयवह्निनिष्ठप्रतियोगित्वं तदवच्छेद
कीभूतवह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयवह्नेश्च द्वयोरनधिकरणत्वस्य हेतुमति पर्वते सत्त्वादिति वाच्यं प्र
तियोगिव्यक्तीनां भेदेप्येकधर्मावच्छिन्नप्रतियोगितायाः लाघवेनैकस्वीकारात् न च कालो घटवान् महाकालत्वादित्यादौ तादृ

२ त्वाद्युः। यत्प्रतियोगितावच्छेदकविशिष्टयत्प्रतियोगिताश्रयोभयसंबाहेत्वधिकरणयत्किंचिन्निष्ठाभावप्रतियोगितावच्छेदके २
२ तादृशप्रतियोगितायाऐवानिवेश्यतया घटत्वेन गगनाभावादिकमादायैव तत्र लक्षणसंभवाच्चेति ॥ २

३५ शप्रतियोगित्वाप्रसिध्याऽव्याप्तिः गगनाभावीयप्रतियोगित्वाश्रयीभूतगगनस्याधिकरणाप्रसिध्या तादृशप्रतियोगितायालक्षण
घटत्वादितिवाच्यं महाकालान्यत्वविशिष्टघटाद्यभावस्य तादृशविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वादि[illegible]त
न्नप्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगितायायद्यभेदः तदा वह्नित्वेन घटाद्यभावस्य यावद्वह्नित्वावच्छिन्नघटनि
ष्ठं प्रतियोगितास्येव वह्नित्वेन वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्ना वह्निनिष्ठा प्रतियोगिता लाघवात्तथाच सामानाधिकर
णापनेत्यस्य वैयर्थ्यं दुर्वारं वह्नित्वेन घटाद्यभावाद्यं यद्धटनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्रतियोगि
ताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हेतुमत्त्वेन वह्नित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः
लक्षणाघटकत्वादिति दिक् एवं चेति तत्पाचाव्यभिचारस्य पारिभाषिकत्वानादरेपि न क्षतिरिति भावः वह्नित्वाद्यवच्छिन्नघटाभाव
वतिधूमादेर्वर्त्तमानत्वादुक्तं साध्याभावेति अत्र च साध्याभावो व्याप्यवृत्तिर्बोध्यः एवं[illegible]त्रापि विशिष्टेति महानसीयत्वादिवि ५र
शिष्टवह्नित्वावच्छिन्नप्रतियोगिताकस्येत्यर्थः ननु विशिष्टस्यातिरिक्तत्वान्महानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव वा परंपरया त
त्वावच्छेदकत्वान्नैषदोष इत्यत आह हृदत्ववह्नित्वेति ननु व्याप्यवृत्तित्वघटितलक्षणयोस्संयोगीसत्त्वादित्यत्रातिव्याप्तिः स्व
समानाधिकरणाभावाप्रतियोगित्वरूपस्यावच्छिन्नवृत्तिकान्यत्वरूपस्य वाव्याप्यवृत्तित्वस्य संयोगाभावेऽसत्त्वादत

नि

आहसत्ववत्तीति यश्चहेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यंते नैरवच्छिन्नहेत्वधिकरणकत्वे हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठा
भावाप्रतियोगित्वं वाभावस्य विवक्षितमितिभावः। गुरुधर्मेणासाध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेद
कत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृतनिरुक्तावप्रवेशेपि नक्षतिरित्याशयेनाह वस्याणांवेति यथाश्रुतस्य
प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्तावान् जातेरित्यादावव्याप्तिः तादृशप्रतियोगितावच्छेदकीभूतविशिष्टस
त्तायानतिरिक्तवृत्तित्वात्सत्तात्वस्येत्यतोवक्ष्यमाणमिति सिद्धांतलक्षणेवक्ष्यमाणमित्यर्थः तथाचहेतुमन्निष्ठाभावीयय
त्संबंधावच्छिन्नप्रतियोगितायास्समानाधिकरण्येनावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयतत्संबंधावच्छिन्न
प्रतियोगितायास्सामानाधिकरण्येनानवच्छेदकंतदेवपारिभाषिकावच्छेदकंतदन्यत्वंसाध्यतावच्छेदकेवाच्यमिति
भावः ननु उत्पत्तिदशायां गुणसामान्याभावस्य संयोगवति घटादौ सत्वात् द्रव्यत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठा
भावाप्यसमवायसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहान्नतादृशसंयोगत्वस्य पारिभाषिकावच्छेद
कत्वंसंभवतिनवापातत इत्याह गुणावृत्तित्वेति गुणासमवेतत्वेत्यर्थः घटादौ व्युत्पत्तिदशायामपि गुणासमवेतस्य द्रव्यत्व।

देसत्वान्नतदभाव इति भावः संयोगागुणान्यत्वे सतिस [redacted] त्वादिसाद्दौ गुणावृत्तित्वमादाय संयोगत्व [redacted]
३६ [redacted] स्य न पारिभाषिकावच्छेदकत्वं संभवति गुणावृत्तित्वावच्छिन्नाभावस्य हेतुसमानाधिकरणत्वादतस्संयोगसाध्यकव्यभिचा
रिमात्रियद्धर्ममादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममाह द्रव्यमात्रेति द्रव्यान्यासमवेतत्वेत्यर्थः उक्ताभावाना
मव्याप्यवृत्तित्वे संयोगात्मकस्वप्रतियोग्यधिकरणवृत्तित्वेन कदाचिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयो
गत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तस्यान्तरेवतु नास्तितेषां व्याप्यवृत्तितया संयोगात्म
कस्वप्रतियोग्यधिकरणावृत्तित्वादेतावन्मात्रं सूचयितुं व्याप्यवृत्तीति प्रागल्भलक्षण [redacted] दूषयितुमु
पन्यस्य साध्यतावच्छेदकेति स्वपदं विशिष्टहेतुपरं तथा च यद्धर्मावच्छिन्नसमानाधिकरणसाध्याभाव
त्वावच्छेदेन साध्यसामानाधिकरण्यं तद्धर्मवत्त्वं पर्यवसितं अवच्छेदकत्वं चेहानतिरिक्तवृत्तित्वं व्यभिचा
रिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः
प्रसंगः विशिष्टसत्तावान् जातेरित्यादौ यावत्त्व हेतुसमानाधिकरणसाध्याभावस्य सत्तारूपसा

ध्यसामानाधिकरण्यमितिव्याप्तिः अतः साध्यतावच्छेदकावच्छिन्नेति तथाच विशिष्टसत्ताभावस्यैव तादृशस्य विशिष्टत्वासत्वात्स
मानाधिकरण्यत्वान्नातिव्याप्तिप्रसंगः अतश्च साध्यसामानाधिकरण्यं येन संबंधेन साध्यता तेन संबंधेन साध्यस्याधिकर
णे दैशिकविशेषणतया वृत्तिमत्वरूपं ग्राह्यं तेन द्रव्यत्वादिसमानाधिकरणस्य ज्ञानाद्यभावस्य विषयतया ज्ञानाधिकरणे
वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादिहेतौ नातिव्याप्तिः न वा कालः प्रमेयत्वादित्यादौ सर्वेषामेव साध्यवति कालिक
संबंधेन वृत्तावपि नातिप्रसंगः साध्याभावनिष्ठहेतुसामानाधिकरण्यमपि हेतुतावच्छेदकसंबंधेन प्रकृतहेतोर्यदधिकरणं
तत्र विशेषणतया वृत्तिमत्वरूपं बोध्यं तेनायमात्माज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्तमानस्यात्मत्वाभाव
स्य द्रव्यविशिष्टसत्वादित्यादौ च सत्तासमानाधिकरणस्य द्रव्यत्वसामान्याभावस्य साध्यसामानाधिकरण्यविरहेपि ना
व्याप्तिः न वा कालेः कालपरिमाणादित्यादौ हेत्वधिकरणे कालिकसंबंधेन वर्तमानस्य कालत्वादिसामान्याभावस्य सा
ध्यवति दैशिकविशेषणतया वृत्तिविरहेपि न क्षतिः साध्याभावस्य पूर्वोक्तद्वितीयपरिष्कारो बोध्यः तेन व्यधिकरणध
र्मावच्छिन्नाभावासत्वेपि साध्यस्याविशिष्टाभावादिकमुपादायैव लक्षणसंभवान्न प्रतियोग्यवृत्तित्वस्येत्यादि अथाव

ताराः संगतिः कपिसंयोगी सत्वादित्यादौ तु कपिसंयोगाद्यभावस्य साध्यसामानाधिकरण्येपि द्रव्यमात्रसमवेतत्वाद्य
वच्छिन्नाभावस्य सामानाधिकरण्यविरहान्नातिव्याप्तिः कालिकसंबंधावच्छिन्नप्रतियोगिताकगगनाभावसाम
वे साध्ये यत्र मेयत्वादिके हेतुस्तत्र हेतुमत्ति दैशिकविशेषणतया वर्तमानस्याकाशाभावात्मकसाध्याभावस्य साध्य
वत्ति दैशिकविशेषणतयावृत्तावपि हेतुसमानाधिकरणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभाव
त्वात्तस्यैव सामानाधिकरण्यविरहान्नातिव्याप्तिः यत्समानाधिकरणेति यत्समानाधिकरणसाध्याभावप्रमासा
मान्यइत्यर्थः तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रमाव्यक्तेः साध्यवत्ताज्ञानाविरोधित्वेपि
साध्यसामान्याभावप्रमायाः एव साध्यवत्ताज्ञानविरोधितया नातिव्याप्तिः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य सा
ध्यसामान्याभावत्वभ्रमदशायां पर्वतो न वह्निमानित्याद्याकारकतद्बुद्धेः साध्यवत्ताज्ञानाविरोधित्वादसंभवः स्यादिति
प्रमात्वोपादानं प्रमात्वं चात्र भ्रमसामान्यभिन्नज्ञानत्वं नातस्तादृशबुद्धेरप्यंशतः प्रमात्वादुक्तदोषतादवस्थ्यं ह्र
दादौ वह्निसामान्याभावप्रमायाः साध्यवत्ताधीविरोधित्वादव्याप्तिरतो यत्समानाधिकरणेति फलितः प्रमाविशेषणं तथा

च्छयद्धर्मावच्छिन्नविशेष्यकसाध्याभावप्रमासामान्यइत्यर्थः तेन तद्वह्नित्वसमानाधिकरणस्य संयोगसामान्याभा
वस्यैव गुणे धर्मिणि प्रमायाः साध्यवत्ताज्ञानविरोधित्वेपि संयोगस्य तद्वह्नित्वादित्यादौ नाव्याप्तिः यत्तु साध्यवत्ताज्ञानविरो[redacted]धित्वं हेतु
मन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्यवत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं तथा च गुणे न संयोगादिति प्रमायाः गुणः संयोग
त्वाकारकबुद्धिविरोधित्वेपि नादृशी साध्यवत्वधीः न हि तु मन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यिका गुणत्वादेर्हेतुमदन्यवृत्तित्वात्
तेनोक्तदोष इति तन्तुच्छं यत्समानाधिकरणत्वस्य व्यर्थतापत्तेः साध्याभावप्रमासामान्ये यद्वन्मात्रवृत्तिधर्मावच्छिन्नवि
शेष्यकसाध्यवत्ताज्ञानविरोधित्वं नास्ति तत्वमित्यस्यैव सम्यक्त्वात् जलादिधर्मिकवह्निसामान्याभावप्रमायास्साध्यवत्व
धीविरोधेपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यद्वह्निमत्ताज्ञानं तद्विरोधित्वादेव वह्निमान् धूमादित्यादावव्याप्त्य
भावादिति दिक् अत्र च साध्यतावच्छेदकेन संबंधेन रूपेण च साध्यवत्ताज्ञानं बोध्यं तेन सं पर्वतः समवायेन न वह्निमानि
ति प्रमायास्समवायेन वह्निमत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमान्निति प्रमायाश्च संयोगेन महानसीयवह्निमत्वबो

३८

धंप्रति प्रतिबंधकत्वेपि वह्निमान्धूमादित्यादौ तो व्याप्तिः प्रतिबंधकत्वं चात्र अवच्छेदकधर्मवत्तात्माहादिव्यावर्त्तनाय हेते
नवह्निसामान्याभावावच्छेदकतया गृहीतस्य महानसीयवह्न्यभावादेः पर्वतादौ प्रमायाः संयोगसंबंधावच्छिन्नपर्वतधर्मि
कवह्निमत्ताबुद्धिविरोधित्वेपि नासंभवः सर्वत्रेति साध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणत्वकत्वमिति अ
त एव प्रथमस्य द्वितीयस्य च यत्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञानविरोधित्वं नास्ति तत्त्वमित्यत एव सा
मंजस्यादिति भावः यत्तु यत्समानाधिकरणसाध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधि
करण्यं तत्त्वमेव प्रथमलक्षणार्थः तथा च धूमसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वाद्यवच्छिन्नघट
द्यप्रसिध्या साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरणाभावादसंभवः स्यादतः साध्याभावपदं नैवम
पि प्रतियोगिपदवैयर्थ्यमेवेति वाच्यं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नप्रतियोगि
सामानाधिकरण्याभावस्याखंडस्यैव निविष्टत्वात् एवं द्वितीयलक्षणेपि साध्यतावच्छेदकावच्छिन्नप्रतियोगि

मत्तागोधविरोधित्वं निवेश्य साध्याभापदववत्तापदसार्थक्यं बोध्यमिति तन्मतं प्रतियोग्यवृत्तिश्चेत्यादिग्रंथावतारानुरो
धेन साध्याभावस्य पूर्वोक्तवृत्तितापर्याप्त्यैव वक्तव्यतया हेतुसमानाधिकरणस्य वह्नित्वेन घटाभावादेः साध्यतावच्छेदकावच्छि
प्रतियोगिसामानाधिकरण्याप्रसिध्या तादृशपदप्रक्षेपेप्यव्याप्तितादवस्थ्यान्न च घटत्वेन वह्न्यभाव एव वह्नित्वेन घटाभा
वः समनियताभावानामैक्यात्तथा च तस्यापि साध्यतावच्छेदकविशिष्टवह्निरूपप्रतियोगिनः सामानाधिकरण्यमक्षतमेवे
ति वाच्यं तथा सति घटसामान्याभावादेरपि घटत्वादिना प्रमेयसामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वा
वच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासंभववारकस्य साध्याभावपदस्य व्यर्थतापत्त्या वज्रलेपत्वाद
तिप्रगल्भस्यैव लक्षणांतरमुपन्यस्यति यद्वेति यद्वृत्तावितीति यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यइत्यर्थः तेन वह्नि
निष्ठस्य व्यधिकरणधर्मावच्छिन्नधूमाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यनुविरोधित्वेपि धूमवान्वह्नेरित्यादौ ना
तिव्याप्तिः धूमादिनिष्ठस्य तु धनत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वस्यापि धनत्वादिप्रकारेण वह्न्यनुमितिविरोधित्वादसंभ
वः स्यादतः प्रकृतेति साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकरूपेण प्रकृतसाध्यकेत्यर्थः तथा च तादृशसाध्याभाववद्वृ
त्तित्वस्य वह्नित्वेन वह्न्यनुमितिं प्रत्यविरोधित्वान्न दोषः प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविष

यत्त्वमात्रं धूमनिष्ठवृत्तित्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्याविषयत्वसंभवात् किंतु विषयितया प्रकृतानुमिति
३८ प्रतिबंधकतावच्छेदकत्वं तथा च वह्निष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकत्वाभावाद् व्यभिचारिण्यपि व्या
प्तिरतस्साध्याभाववन्निरूपितत्वघटितेन तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्येन प्रकृतानुमितिप्रतिबंधकतावच्छेदकं तत्त्वम
र्थः न च घटाभाववद्वृत्तित्वादौ साध्याभाववद्वृत्तित्वत्वभ्रमदशायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वह्निष्ठसनिर्धूमव
न५ त्तित्वस्य धूमसाध्यकानुमितिप्रतिबंधकतावच्छेदकत्वाद्व्यभिचारिण्यपि व्याप्तितादवस्थ्यमिति वाच्यं यन्निष्ठसाध्याभाव
वद्वृत्तिविषयितासामान्येन प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यस्योक्तत्वात् साध्याभाववत्त्वपूर्वोक्तद्वि
तीयरीत्या प्रवेशनाच्च तेन न पूर्वोक्तदोषः अनुमित्यविरोधित्वेनापि अनुमितिविरोधित्वं हि न साक्षादनुमितिप्रतिबंधक
त्वं व्यभिचारधियः साक्षादतथात्वेन व्यभिचारिमात्रे अतिप्रसंगापत्तेः किं त्वनुमितिजनकज्ञानविरोधित्वं तज्जनकं च
परिनिरुक्तव्याप्तिज्ञानं तदा तादृशज्ञानं प्रति न साध्याभाववद्वृत्तित्वं विरोधि किंतु साध्याभाववद्वृत्तित्वमनुमितिविरोधि
इत्याकारकं ज्ञानमेव तथेति व्यभिचारिण्यपि व्याप्तिः यदि साध्याभाववद्वृत्ति हेतुरित्याकारकज्ञानं प्रकृतानुमिति
जनकं तदा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमर्थांतरं त्वस्तामिति भावः एतेन यदि प्रकृतानुमिति

पदं प्रकृतहेतुधर्मिकसाध्यव्याप्त्यनुमितिपरं न तु प्रकृतसाध्यकानुमितिपरं विरोधित्वं चात्र साक्षादेव निवेश्यतेऽतो नान
व्यभिचारिण्यतिप्रसंग इत्यपास्तं नातश्च व्याप्तेरनुमित्यनुपयुक्ततया तदभिधानेऽर्थान्तरं तादवस्थ्यादिति मिश्रलक्षणं
परिष्कृत्योपन्यस्यन्ति केचित्तन्न केवलान्वयिनि प्रसिद्ध्याव पि वह्न्यादिव्यतिरेकि साध्यके यावन्तः साध्याभावास्तत्तज्जाती
यत्वं तत्त्वत्वेनानुगतरूपात्मकमप्रसिद्धमतउक्तं प्रत्येकमिति यावन्तः साध्याभावास्तेषां प्रत्येकमपि सजातीयत्वमेकस्मिन्न
भावेनास्तीति त्वतउक्तं तत्तत्सजातीया इति तदधिकरणावृत्तित्वाभावा इत्युक्तौ तत्त्वेन यावत्साध्याभावपरामर्शे वह्निमान्
धूमाद्रूपसामान्याभाववान्वायुत्वादित्यादौ साध्याभावात्मकतत्तद्व्यक्तित्वावच्छिन्नाभावयावद्रूपाधिकर
णाप्रसिद्धाऽत्र व्याप्तिरतस्तत्तदधिकरणेति तथा च प्रातिस्विकरूपेण साध्याभावानुपादाय तत्तत्सजातीयत्वस्तदधिकर
णावृत्तित्वाभावोऽत्राह इति भावः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य सजातीयं घटत्वादिना तदधिकरणावृत्तित्वा
भावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यावन्त इति तथा च साध्यसामान्याभावसजातीयत्वस्य तदधिकरणावृत्तित्वसा
मान्याभावस्यात्रासत्वाद्दोषः साध्यसामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावोऽपि व्यभिचारिण्य

व्यस्तात्वात् सजातीयत्वादित्युक्तं।। ननु घटत्वेन निर्धूमवह्निमतो भावो प्यभावत्वादिना धूमसामान्याभावसजातीय एव इत्यतिव्या
प्तिस्तादवस्थ्या अत आह साजात्यं चेति यद्यपि साध्याभावनिष्ठं यत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधि
करणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तेनैव साजात्यं वाच्यं तथा च वह्निसामान्याभावादिनिष्ठं वह्नित्वावच्छिन्न
वह्निप्रतियोगिताकत्वस्वरूपं एतादृशान्यतररूपं तस्य निर्वह्निवृत्तित्वसामान्याभावादावसत्वात् असंभवः।। तथापि यावंतस्स
मानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वादभावान्यतररूपेण साजात्यं वाच्यमित्यदोषः समनियताभावैक्या
गगनाभाव एव निखिलव्यधिकरणधर्मावच्छिन्नाभाव इति मते तु गगनाभावत्वादन्यत्वान्यतररूपेणैव साजात्यं वाच्यं तेन घ
टत्वेन निर्धूमवह्निमतो भावस्यैव गगनत्वादिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतया धूमसामान्याभावसजा
तीयत्वेपि नातिव्याप्तिः साध्याभावश्चेति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको अभावो
ऽत्र साध्याभावपदेनोक्त इत्यर्थः साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वरूपप्रथमरीत्याभिधाने घटत्वविशिष्टवा
च्यत्वाद्यभावस्यापि साध्याभावपदार्थतया तत्सजातीयस्यतद्धिकरणवृत्तित्वाभावस्य कुत्रापि हेतावसत्वादसंभ

वः स्यादिति तत्परित्यागः। अत्र साध्यव्यापकताघटकसंबंधेनैव साध्यव्यापकस्याभावो ग्राह्यः तेनैकसंबंधेन साध्यव्यापकस्य सं
बंधांतरावच्छिन्नाभाववति हेतोर्वृत्तावपि न क्षतिः। यत्तु साध्यतावच्छेदकसंबंधेनैव साध्यव्यापकत्वं तेनैव संबंधेन साध्यव्यापकस्या
भावो निवेश्य इति मतं तन्न युक्तं। यत्र तादात्म्येन प्रमेयमात्रं साध्यं तत्र तादृशसंबंधेन साध्यव्यापकतावच्छेदकं यत्प्रमेयत्वादिकं ता
दात्म्येन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिध्या तत्र सद्धेतावव्याप्तिः प्रमेयत्वेन घटपटोभयभेदस्याकारेणाकथंचित्तत्राव्या
प्तिवारणेपि वह्न्यनियामकसंबंधेन साध्यतायामव्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः। किं चैवं धूमवा
न्वह्नेरित्यादावतिव्याप्तिः। संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाद्यभावस्येव तादृशस्य यावंतर्गत
त्वेन तत्सजातीयस्य तदधिकरणावृत्तित्वाभावस्य वह्नौ सत्वात् अस्माकं तु स्वरूपसंबंधेनायःपिंडभेदस्यापि धूमव्यापकतया वह्नि
तद्भाववद्वृत्तित्वादेवातिव्याप्तिनिरासादिति ध्येयं। ननु कपापि संयोगाएतत्वादित्यत्र अव्याप्तिः कपिसंयोगसामान्याभाव
स्यापि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदंतर्गतत्वात्तत्सजा
तीयस्य तदधिकरणावृत्तित्वाभावस्य हेतावभावादत आह व्याप्यवृत्तीति व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वं संयोगा

सत्तादित्यादौतु द्रव्यत्वादिसामान्याभावस्यापि साध्याभावत्तया हेतोस्तदधिकरणावृत्तित्वादेव जातिव्याप्तिः ननु रूपवान्पृथि
४१ वीत्वादित्यादावव्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावांतर्गतत्वात्तत्तज्जातीयस्य तत्तदधिकरणात
दधिकरणावृत्तित्वसामान्याभावस्य हेतावसत्वात्सामान्यधर्मेणाविशेषाभावस्वीकारेतु रूपत्वेनात्तद्रूपाभावमादायाव्याप्ति
रत आह प्रतियोगितावच्छेदकावच्छिन्नेत्यादि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्याधिकरणत्वं च यत्प्रतियोगिताके अ
भावेस्वावच्छेदकसंबंधेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वं तेन नित्यरूपा
त्मकेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिना सामानाधिकरण्यविरहे प्युक्ताभावस्य न संग्रहः । नवा वाच्यत्वेन प्रमेय
त्वाद्यभावस्यैव तादृशत्वेन वाच्यत्वाद्यभावतया व्याधिकरणधर्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिसामानाधिकरण्यापत्तेः संग्रहः ॥ निरुक्तयास्तदन्यप्रतियोगितायाश्चैवसाध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं वाच्यं तेन
नैसंयोगात्मकस्यैव स [redacted] ध्याभावस्य समवेतसामान्याभावनिष्ठनिरुक्तप्रतियोगिताकत्वं कपि संयोगाभावत्वरू
साध्यव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि संयोगाभाववान्द्रव्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभा

वस्यैव नित्यरूपसामान्याभाववत्त्वात् तत्र नित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकसाध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रति
योगिताकत्वयोः सत्त्वेपि रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः समवेतसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छे
दकरूपानवच्छेद्यत्वादिति ध्येयं । इति व्यतिरेकिप्रवेशस्य फलमाह । तत्तत्साध्यव्यक्तीति । अभाववति वृत्तावपि हेतोर्नाव्याप्तिरित्यन्व
यः व्याप्यवृत्तित्वादेः फलमाह अव्याप्यवृत्तेर्वा साध्यत्वे इति । तत्तत्साध्याभाववद्वृत्त्यादिसामान्यात् साध्याभाववद्वृत्तित्वव्यापकेत्युक्तौ
वह्निसामान्याभावसजातीयस्य व्यधिकरणधर्मावच्छिन्नाभावसाधारणसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावस्या
प्रसिद्ध्या व्यतिरेकिमात्रे व्याप्तिरतस्तत्तदिति साध्याभावस्य विशेषणं तथा च निर्वह्निवृत्तित्वादिसामान्याभावस्य निर्वह्निवृत्ति
त्वव्यापकप्रतियोगिताकस्तत्र साध्याभावसजातीयोस्तीत्यदोषः नन्वेवमपि निर्धूमवृत्तित्वेन निर्धूमवृत्तित्ववह्निभेदो
भयाभावस्य जलवृत्तित्वेन निर्धूमवृत्त्यभावस्य च निरुक्तरूपशालिनो वह्नौ सत्त्वादतिव्याप्तिः न च व्यासज्यवृत्तिधर्मावच्छि
न्नमिव स्वसमानाधिकरणस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमपि प्रतियोगितायां विशेषणं वाच्यं अतो नोक्तदोषः तथापि गुण
भेदाभावसजातीयस्य पूर्वक्षणावृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्त्वात् गुणभिन्नत्वे सत्त्वादित्यादावतिव्याप्ति

रतग्राहितत्तत्साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽवोध्य इत्ययं पाठः क्वाचित्कः। तत्रातिरिक्तत्वा
तेन निर्वह्निवृत्तित्वसामान्याभावादेः संग्रहः। अन्यथा वह्निसामान्याभावसजातीयस्यसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताका
४२ भावाप्रसिद्ध्या व्याप्तिः। न च निर्धूमत्वादिसजातीयस्य निर्धूमवृत्तित्वत्वादिना वस्तुवृत्तेरभावस्य वह्नेः सत्त्वाद्धूमवान्वह्नेरित्यादाव
तिव्याप्तिः हेतुताघटकसंबंधावच्छिन्नवृत्तित्वमात्रनिष्ठत्वेन प्रतियोगितायाः विशेषणाद्यत्वेपि निर्धूमवृत्तित्वेन जलवृत्ति
त्वजलान्यनिर्धूमवृत्तित्वोभयाभावमादायातिव्याप्तिताद्वस्थ्यमिति वाच्यं एतदक्षरसे नैवलक्षणांतर[illegible]स्य वक्ष्यमाणत्वा
त्प्रथापित तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावादित्यस्यैव सम्यक्त्वे समानाधिकरणधर्मादिकं प्राप्त्यनिषेधस्य प्र
वेशो व्यर्थः सर्वत्र व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन घटाद्यभावस्यैवतादृशसजातीयस्य संभवात् ॥ तथा
पि यथासन्निवेशान्न वैयर्थ्यं यत्र तादात्म्यसंबंधेन हेतुता तत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्य
स्य जगत्स्वरूपतयातादृशतादात्म्यत्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिद्ध्याव्याप्तिः स्यादतो निषेधस्य गा
र्भता। यत्तु साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्युक्तावसंभवः स्या व्यधिकरणधर्मावच्छिन्नसाध्यासाध्याभावव

वृत्तित्वावच्छिन्नाभावाप्रसिद्धेस्तादृशवृत्तित्वमपेक्ष्य लघीयोवृत्तित्वमात्रस्यैवोक्ताभावप्रतियोगितावच्छेदकत्वादिति तत्तुच्छं
गुरोः प्रतियोगितावच्छेदकत्वमंगीकृत्यैव लक्षणाकरणात् अन्यथा महाकालभेदसाध्यके जन्यत्वविशिष्टघटादेः कालिकसंबंधेन
हेतुतायामव्याप्तिः महाकालभेदाभाववद्वृत्तित्वमपेक्ष्य लघुना वृत्तित्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगिता
याः अवच्छेदान्महाकालभेदाभावसजातीयस्य तद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्या न
प्रसिद्धेरिति ध्येयं तादृशवृत्तित्वव्यापकेत्यस्य फलमाह व्यक्तिविशेषवृत्तित्वस्येति। अभावमादायनातिप्रसंग इत्यर्थं न्वयः
ननु व्यभिचारनिरूपकाधिकरणवृत्त्यन्यत्वाभावस्यापि साध्याभाववद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यप
सत्वात्कुतोऽतिव्याप्तिरत आह पार्थिवत्वादिति। पार्थिवत्वादिविशिष्टे यत्र धूमवृत्तित्वं तद्वह्नौ नास्तीति वह्नेः पार्थिव
त्वादिस्यातिप्रसंग इति भावः आदिना जलत्वादि संग्रहः व्याप्यवृत्ति धर्मानवच्छिन्नेत्यस्य प्रयोजनमाह द्वित्वावच्छि
न्नस्येति निर्धूमवृत्तित्ववह्नौभेदोभयत्वावच्छिन्नस्येत्यर्थः न दोष इति अन्यथा निर्वह्निसंयुक्तत्वाभावस्य साध्याभाव
वद्वृत्तित्वव्यापकप्रतियोगिताकत्वाभावान्निर्वह्निवृत्तित्वसामान्याभावस्य च धूमे ऽसत्वादव्याप्तिरेव स्यादिति भावः॥
इत्यस्य चेति साध्याभाववद्वृत्तित्वस्य हेतुतावच्छेदकसंबंधेनोक्तावित्यर्थः तादृशसंबंधेन हेत्वधिकरणप्रवेशे गौरव

मतः कस्यचिदित्युक्तं तथा च हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतावद्वृत्तिमत्त्वं साध्याभावविशेषणमित्यर्थः सत्त्वादित्या
दिपदेन वह्निमान् धूमादित्यादेः परिग्रहः तत्रापि जातिसामान्याभावादेः निरुक्तसाध्याभाववत्तया तद्वृत्तिसंयोगेन वृत्त्यप्रसि
४३ द्ध्या ऽव्याप्तिसंभवात् ननु द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः विशिष्टसत्त्वस्य सत्तानतिरेकेण द्रव्यत्वाभाववति वृत्त्या द्र
व्यत्वाभावसजातीयस्य तद्वृत्तित्वाभावस्य हेतुतावसत्त्वात् न चैवं विशिष्टहेत्वधिकरणे वर्त्तमान एव साध्याभावो ग्रह्यतां ता
वतैवोक्तदोषव्युदासादिति वाच्यं तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिः निर्धूमवृत्तित्वसामान्याभावस्यापि महानसीयव
ह्नौ सत्त्वात् न च हेतुतावच्छेदकयद्धर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितं तथा सत्यपि निर्धूमत्वादिसजातीयं नि
र्धूमवृत्तित्वेन निर्धूमवृत्तित्ववह्निभेदोभयाभावं जलवृत्तित्वं जलान्यनिर्धूमवृत्तित्वोभयाभावं चादायातिव्याप्तितादव
स्थ्या ऽत आह यद्वेति वह्नित्वाद्यवच्छिन्नधूमाभावसजातीयस्य तद्व्यापकीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छे
दकेन वह्नित्वादिना वह्निं प्रति व्यापकत्वमवच्छिद्यत इत्यतो ऽव्यभिचारित्वापत्तिर्व्याप्तिरतो यावत्तं इति तथा च धूमादिसामा
न्याभावस्यापि यावत्साध्याभावान्तर्गतत्वात् तद्व्यापकीभूताभावप्रतियोगितावच्छेदकेन धूमत्वादिना वह्न्यादिकं प्रति
ति व्यापकत्वाभावान्नातिव्याप्तिः तत्तद्[illegible]धूमाभावसजातीयस्य तद्व्यापकीभूताभावस्य प्रतियोगितावच्छेदकात्तद्

ह्नित्वादिना धूमादिकं प्रति व्यापकत्वाभावादसंभवः इत्यतस्तादृशास्साध्याभावा इति साध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इति तदर्थः तेन वह्नित्वादिकं तु न साध्यव्यापकतावच्छेदकमतस्तदवच्छिन्नाभा
वमादाय नोक्तदोषः तादृशयावत्साध्याभाववत्साजात्यं तादृशयावत्साध्याभाववृत्तिप्रागुक्तान्यतररूपवत्त्वं तच्च व्यतिरेकि
ण्यप्रसिद्धमतः प्रत्येकमिति यद्यपि तादृशयावत्साध्याभावानां प्रत्येकनिरूपितमपि साजात्यं कुत्राप्यभावे नास्तीति व्यतिरेकिण्य
तस्य च तिव्याप्तितादवस्थ्यं तथापि तेषामित्यत्रैतस्य चैतस्य चेत्येकशेषकरणात् यावन्तः साध्याभावाः प्रत्येकं तन्नासजातीयस्यैतत्त्वव्याप
कीभूताभावसत्त्वाभावाद्दोषः धूमादिसामान्याभावव्यापकस्य वह्नित्वादिना घटाद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादि
नावह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाद्व्यभिचारिण्यतिव्याप्तिरतस्सजातीयस्येति साजात्यं प्रागुक्तदिशा तादृशं तेन संयो
गादिसंबन्धावच्छिन्नद्रव्यत्वाद्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना वह्न्यादिव्यापकत्वेऽपि धूमवान्वह्नेरित्यादौ नाति
व्याप्तिः तादृशाभावस्यापि धूमादिसामान्याभावसाजात्यविरहादिति ध्येयं धूमादिसामान्याभावसजातीयस्य तद्वि
ष्ठान्योन्याभावप्रतियोगितानवच्छेदकतया तद्व्यापकीभूतस्य च वह्निसंयोगाद्यभावस्य प्रतियोगितावच्छेदकेन वह्नि

४४

संयोगत्वादिना वह्न्यादिकं प्रति व्यापकत्वादिति व्याप्तिरतो व्याप्यवृत्तिरिति वक्तृत्तो वह्नित्वेन धूमवद्वृत्तेर भावस्य प्रतियोगिताव
च्छेदके न वह्नित्वेन वह्निं प्रति व्यापकत्वादिति व्याप्तिरतो व्याप्यवृत्तिता निरूपकप्रतियोगिता लाभाय व्याप्यवृत्तिपदं तेन य
त्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः तादृशप्र
तियोगिताया एव लक्षणाघटकत्वान्नोक्तदोषः धूमाद्यभावसजातीयस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वा
दिना वह्न्यादिकं प्रति व्यापकत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतो व्यापकीभूतस्येति यद्यपि तत्र व्यभिचारस्थलान्यत्वा
भावस्यापि निरुक्तसाध्याभावतया तत्सामानाधिकरण्यस्य तत्सजातीयाभावस्य प्रतियोगितावच्छेदकधर्मेणात तत्संयोगोल
कभेदत्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाभावात् सामानाधिकरण्यमात्रोक्तावपि नातिव्याप्तिः तथापि साध्याभाव
व्यापकत्वघटितनिरुक्तो साध्याभावसजातीयाभावे साध्याभावसामानाधिकरण्यस्याप्रविष्टतया न व्यापकीभूतपर्यं
तस्य वार्थतेति ध्येयं यत्तु साध्यतावच्छेदकसंबंधेन साध्यव्यापकतायाः यदवच्छेदकं तेनैव संबंधेन तद्रूपावच्छिन्नाभावो
ऽत्र साध्याभावशब्दार्थः तथा चायोगोलकभेदत्वस्य संयोगात्मकसाध्यतावच्छेदकसंबंधेन न धूमव्यापकतावच्छेद

कत्वमितितदवच्छिन्नाभावो न साध्याभावः किंतु धूमाद्यभावः एवं तत्समानाधिकरणस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेद
केन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वादिति व्याप्तिः ततः समानाधिकरणत्वेत्यपहाय व्यापकीभूतस्य तु कं
चैवं वह्निमान् धूमादित्यत्राव्याप्तिः संयोगेन वह्न्यभावस्यापि साध्याभावतया तस्य केवलान्वयित्वेन तत्सजातीयस्य तु व्यापकी
भूतत्वव्याप्यवृत्त्यभावाप्रसिद्धेः [redacted] रिति वाच्यं यावन्तो व्याप्यवृत्तयस्साध्याभावाः तेषां प्र
वेशे यावद्वह्निसामान्याभावस्य च निरवच्छिन्नत्वेऽधिकरणवृत्तिकत्वरूपव्याप्यवृत्तित्वविरहेण यावदन्तर्गतत्वा
त् धूमाभावस्य वह्निमदयोगोलक एव तादृशव्याप्यवृत्तिरिति तन्न तादात्म्येन प्रमेयमात्रस्य साध्यतायामव्याप्तेः तत्र प्र
मेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया तादात्म्येन तदवच्छिन्नाभावाप्रसिद्धेः अन्ये तु यावन्तः साध्याभावाः प्र
त्येकं तत्तज्जातित्वानिष्ठं यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वेन साध्याभावव्यापकतावच्छेदकं तद्रूपेणावृत्तित्वे
त्त्वं यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमर्थः तच्च साध्याभावव्यापकतावच्छेदकत्वमपहाय साध्या
भावसमानाधिकरणावृत्तित्वेत्तौ गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावादित्यत्राव्याप्तिर्गुणा

६ व्यापकीभूततादृशाभावप्रतियोगितावच्छेदकेन ६

न्यत्वविशिष्टसत्ताभावाभावस्वरूपस्य द्रव्यान्यत्वाद्यभावरूपस्य वा निरुक्तसाध्याभावस्य सजातीयस्य समानाधिकरणोच
४५ सत्तास्वरूपे ऽभावे वर्त्तमाने यत् द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मावच्छिन्नप्रतियोगिताकाभावत्वं तेन द्रव्यान्यत्व
विशिष्टसत्ताभावत्वरूपधर्म्मेणाहेतुतावच्छेदकावच्छिन्नं प्रतिव्यापकतावच्छेदकत्वात् साध्याभावव्यापकतावच्छेदकत्वे
नौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकत्वादिकं न गुणान्यत्वविशिष्टसत्ताभावाभावाद्यात्मक
स्य द्रव्यान्यत्वाद्यभावस्वरूपस्य वा साध्याभावस्य व्यापकतावच्छेदकं द्रव्यत्वं व्यभिचारादतो नोक्तदोष इति प्राहुः द्रव्य
विशिष्टसत्त्वादित्यादौ तादृशगुणाद्यभावस्य व्यापकीभूता तादृशाभावप्रतियोगितावच्छेदकेन धर्म्मेण गुणत्वादिना सत्ता
दिकं प्रतिव्यापकतानवच्छेदकत्वाद् व्याप्तेराह यद्रूपावच्छिन्नेति न चैवं गगनं स्पन्दत्वादित्यादौ तादृशसजातीयत्वाद्यभावस्य प्र
तियोगितावच्छेदकीभूतगगनत्वादिनापि कालिकसंबंधेन स्पन्दत्वव्यापकत्वादतिव्याप्तिरिति वाच्यं तादृशाभावस्य
यत्प्रतियोगितायामवच्छेदको यः संबंधस्तत्प्रतियोगितावच्छेदकसंबंधेन हेतुव्यापकत्वस्योक्तत्वादिति भावः परे परिष्कृ
तं निरसितुमाह साधनसत्त्वादिना तादृशेति यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीयव्यापकीभूताभावेत्यर्थः तद

५ कर्मान्यान्यत्वविशिष्टसत्ता ५

दच्छेदकत्वं चेतितत्तत्साध्याभावसजातीयतत्तद्व्यापकीभूताभावप्रतियोगितावच्छेदकत्वं चेत्यर्थः प्रथमे दूषणमाह द्रव्यत्वा
दिनाद्दूषणाभावेति [redacted] सा
ध्याभावसजातीयव्यापकीभूताभावेत्यर्थः द्वितीये दूषणमाह शेषंप्रमेयत्वादित्यादि प्रमेयत्वादेरिति नच सामान्यधर्मेण विशेषाभावस्या
पि व्यवस्थापितत्वात्प्रमेयत्वेन गगनाभावस्यैव प्रागुक्तक्रमेण साध्याभावसजातीयस्य प्रतियोगितावच्छेदकं प्रमेयत्वमुपाद
यता व्याप्तिरिति वाच्यं वह्नित्वे महानसीयवह्नेरभावमादाय धूमसाध्यकवह्न्यावतिव्याप्तिः तथा स्वाधिकरणदेशवृत्तिधर्मानव
च्छिन्नाया एव प्रतियोगितायाः प्रवेश्यत्वात्प्रमेयत्वेन गगनाभावप्रतियोगितायाश्चातथात्वात् विषयत्वापेक्षया गुरोः प्रमाविषय
त्वस्य प्रतियोगितानवच्छेदकत्वेनोक्ताव्याप्तितादवस्थ्याच्चेति भावः वस्तुतस्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयो यस्त
त्समानाधिकरणो व्याप्यवृत्त्यभावस्तत्प्रतियोगित्वमेव व्याप्तिः व्याप्यवृत्तित्वं तु प्रकृतहेतुसमानाधिकरणप्रव्यधिकर
णधर्मावच्छिन्नाभावभिन्नत्वे भयाभाववत्त्वं तेन धूमसामान्याभावसमानाधिकरणस्य तत्तत्सजातीयस्य च वह्नि धू
मोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्यकवह्न्यादौ नातिव्याप्तिः स्वात्तद्दशोभयाभावस्य चानिरुक्त व्याप्यव

त्तित्वाभावात् एवं च यत्राभावे प्रकृतसाध्यसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्या
४६ भावपदार्थः तेन नाभाववान् प्रमेयत्वादित्यादौ साध्यप्रतियोगिकस्य घटावृत्तित्वावच्छिन्नाभावस्याधिकरणे घटादौ वर्तमान
स्य तत्त्वसजातीयस्य हेत्वभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिध्याद्वावपि नाव्याप्तिः इत्थं च द्रव्यं सत्वादित्यादौ गुणान्यत्वाद्य
भावस्यापि निरुक्तसाध्याभावत्वात्तदधिकरणगुणादौ वर्तमानस्य तत्सजातीयस्याभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिध्यै
व नातिव्याप्तिर्वाच्यं प्रमेयत्वादित्यादौ तु व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावसमानाधिकरणस्य विरुद्ध घटत्वप
टत्वाभ्यां प्रमेयाभावस्यापि घटत्वादिना वाच्यत्वाद्यभावस्येव वा निरुक्तव्याप्यवृत्तिताशालिनः प्रतियोगितामादाय
लक्षणासंभवः न च वह्निसाध्यकधूमादावव्याप्तिः यावत्ताध्याभावानां तर्गतद्रव्यत्वसामान्याभावसजातीयनिरुक्तव्या
प्यवृत्तिसमानाधिकरणाभावप्रतियोगित्वस्य धूमादावभावात् संयोगेन द्रव्यस्याव्याप्यवृत्तितया धूमाद्यभावस्य लक्ष
णघटकत्वादिति वाच्यं संयोगेन द्रव्यस्य व्याप्यवृत्तित्वस्वीकारात् धूमद्रव्यत्वान्यतरत्वावच्छिन्नाभावस्य निरुक्तरूप
शालिनः प्रतियोगित्वस्य धूमादौ सत्वाच्च इति यथाश्रुतमेव मिश्रलक्षणं सम्यगिति प्रतिमः व्यापकीभूतस्य सजाति

प्यस्येत्यादिपरित्यागेन लघुलक्षणमाह यद्वेति तादृशा इति प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका
भावादृत्यर्थः अत्रापि यत्संबंधेन साध्यव्यापकता तत्संबंधावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्मैः स्वसंबंधेन यद्वृ
पावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते इति पर्यवसितार्थः तेन गगनं स्पंदत्वादित्यादौ गगनत्वाद्यभावप्रतियोगितावच्छेदकै
र्गगनत्वत्वादिभिः कालिकसंबंधेन स्पंदत्वादिहेतुव्यापकत्वेपि नातिव्याप्तिर्नवा वाच्यत्वादिभेदप्रतियोगितावच्छेदकमा
दायैव केवलान्वयिस्थले लक्षणासंभवे प्रतियोग्यवृत्तिश्चेत्यादिग्रंथावतारानुपपत्तिः नच धूमत्वेन धूमाभावस्यैव व
ह्नित्वेन धूमवद्वृत्तेरभावत्वादयःपिंडान्यत्वाभावस्य चायःपिंडान्यत्वलक्षणस्वरूपसंबंधेन भेदत्वावच्छिन्नाभावात्प्र
तियोगितावच्छेदको धूमवद्वह्नित्वभेदत्वादिभिर्वह्नित्वाद्यवच्छिन्नप्रतिव्यापकतावच्छेदाद्धूमवान्वह्नेरित्यादावतिव्या
प्तिरिति वाच्यं यत्प्रतियोगितावच्छेदकाभावे स्वावच्छेदकावच्छिन्नवह्नित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्न
त्वोभयाभावस्तादृशप्रतियोगितायाः एवावच्छेदकधर्मस्य लक्षणघटकत्वादिति संक्षेपः परे त्विति साध्याभा

४८ वच्छिन्नत्वस्य घटत्वादिना भावमादाय व्यभिचारित्वापत्तिर्व्याप्तिरतो यावंत इत्युक्तं तादृशवृत्तित्वाभाववत्त्वमपि दै
शिकविशेषणतया ग्राह्यं तेन निर्धूमवृत्तित्वादिसामान्याभावस्यापि कालिकसंबंधेन वह्न्यादिवृत्तित्वाद्याक्तोपा
दानेपि नातिव्याप्तिस्तादवस्थ्यं वह्निमान् धूमाद्वाच्यं ज्ञेयत्वादित्यादावव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसाध्याभा
ववत्संयुक्तत्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामान्याभावस्य हेतावसत्त्वादतो वृत्तिमद्वृत्तेयइ
त्युक्तं तदनुक्तावसंभवस्तु नास्तितादात्म्यसंबंधेन सद्धेतावेव निरुक्तलक्षणासंगमात् व्यधिकरणधर्मावच्छि
न्नसाध्याभाववत्तातादात्म्यप्रतियोगिकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वस्तुगत्या तादृशवृत्तित्वव्याप
कप्रतियोगिताकतया तथाविधयावदभावस्यैव हेतौ सत्त्वादिति ध्येयं॥ येन संबंधेन हेतुता वृत्तिमद्वृत्तेयइत्यत्रा
पि वृत्तिमत्त्वं तेनैव बोध्यमिति पाठः तदभावस्येति न सामान्याभावस्येत्यर्थः जात्यादाविति समवेतत्वघटितजा
तित्वोक्त्या संबंधांतरेण यो वृत्तिमांस्तद्वृत्तित्वमुपदर्शितं न स्यात् नाव्याप्तिः अत्र वृत्तिमद्वृत्तित्वे दैशिकविशेषण
हेतुताघटकसंबंधेनयोवृत्तिमांस्तद्वृत्तित्वेनतादृशाभावस्ययावदंतर्गतत्वादितिभावः॥ +१

तयाग्रात्यात्तेन वाच्यं घटत्वादित्यादौ वाच्यत्वाभाववत्समवेतत्वत्वसमनियतप्रतियोगिताकस्य समवेतत्वसामान्याभाव
स्यहेतुताघटकसमवायसंबंधेन वृत्तिमत्तिस्पंदादौ कालिकसंबंधेन वर्त्तमानस्य दैशिकविशेषणतया घटत्वादिहेता
वसत्वेपि नाव्याप्तिः इत्यत्रापि त्वपिकारेण साध्याभाववद्वृत्तित्वं तिरपि हेतुताघटकसंबंधेनैव ग्राह्येति व्यंजितं तेन तत्तद्धू
मावयवान्यत्वत्वावच्छिन्नाभावस्यापि पूर्वोक्तद्धिःतिथ्यरित्या साध्याभाववत्वेपि तद्वृत्तिसंबंधे सामान्येन या वृत्तिः तदभावस्य
तत्तद्धूमावयवासमानकालीनद्रव्यवृत्तेर्धूमहेतावसत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः ननु साध्यप्रतियोगिकाभाव
मात्रस्य प्रवेशे धूमस्य तत्तद्व्यक्त्यभाववद्वृत्तित्वा[illegible]द्वह्निमान् धूमादित्यादावव्याप्तिः साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगि
ताकाभावप्रवेशे तु गगनादेस्साध्यत्वे द्रव्यत्वादावतिव्याप्तिः तादृशसाध्याभावस्य केवलान्वयित्वादेवं घ्राणग्राह्यगुणवान्
प्रमेयत्वान्नवा पृथिवीत्वादित्यादावव्याप्तिस्तादृशधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह साध्याभाववदिति पू
र्ववदिति प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिश्चाभावोऽत्र साध्याभावपदार्थः

४८

यथाश्रुते पूर्वोक्तसाध्याभावप्रवेशेनासंगत्यापत्तेः अत्रापि येन संबंधेन व्यापकता तत्संबंधेन तादृशरूपावच्छिन्नाभावो वे
ध्यस्तेन ज्ञानवान् आत्मत्वादित्यादौ स्वरूपसंबंधेन साध्याव्यापकस्य प्रमेयत्वादेः कालिकसंबंधावच्छिन्नाभावाधिकर
णासमवेतत्वाभावस्य स्पंदत्वादिनिष्ठस्य हेतावसत्वेपि न क्षतिः यत्तु साध्यतावच्छेदकसंबंधेन तादृशरूपावच्छिन्नाभावानां
विवक्षणान्न ज्ञानवानात्मत्वादित्यादावव्याप्तिः कालिकसंबंधेन प्रमेयत्वाभावस्य साध्यताघटकसमवायसंबंधावच्छिन्न
त्वादि सं च व्यापकतापि तेनैव संबंधेन ग्राह्या तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यताघटकसमवायसंबंधेन
अभाववति हेतौ वर्तमानत्वेपि द्रव्यत्व पृथिवीत्वादित्यादौ नाव्याप्तिरिति तत्तुच्छं वृत्यनियामकसंबंधेन साध्यतायां तदवच्छि
न्नप्रतियोगित्वाप्रसिध्या सद्धेतावव्याप्तेः धूमवान् वह्नेरित्यादावतिव्याप्तेश्च संयोगसंबंधावच्छिन्नाभावस्य व्याप्यवृत्तित्वा
भावात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगसंबंधावच्छिन्नाभावस्य व्याप्यवृत्तितया तद्वृत्तित्वाभावस्या
पि व्यधिकरणधर्मावच्छिन्नस्यैव वृत्तिमद्वृत्तित्वात् प्रमेयवाच्यत्वादित्यादौ तादात्म्येन साध्यतायामव्याप्तेश्च साध्यताघ

दकतातादात्म्यसंबंधेनप्रमेयत्वादेरेवसाध्यव्यापकतावच्छेदकतयातत्संबंधेनतदवच्छिन्नाभावाप्रसिद्धेःप्रमेयत्वेनघट
पटोभयभेदस्योपगमेपितस्यनिरुक्तप्रतियोगिवैयधिकरण्याभावेनलक्षणाघटकत्वादितिदिक्‌वह्निमान्धूमादित्यादावव्या
प्तिर्वह्निसंयोगाभावस्यापिसाध्यव्यापकतयातदभावात्मकवह्निसंयोगवद्वृत्तित्वसामान्याभावस्यघटादिनिष्ठस्यहेतावभावादतो
व्याप्यवृत्तित्वेनाभावोविशेषितःवस्तुतस्तुनिरुक्तसाध्याभावाधिकरणत्वमवश्यंविशेषणताविशेषेणप्रवेश्यमन्यथाद्रव्यं
रूपादित्यादौद्रव्यत्वाभावस्यकालिकसंबंधेनयदधिकरणंतत्समवेतत्वसामान्याभावस्यज्ञाननिष्ठस्यहेतावसत्त्वादव्या
प्त्यापत्तेस्तथाचवह्निसंयोगाद्यात्मकाभावस्यतादृशसंबंधेनाधिकरणाप्रसिद्ध्यातमादायाव्याप्तेर्वारणार्थंनव्याप्यवृत्ति
पदंपरंतुरूपवान्पृथिवीत्वादित्यादौनित्यत्वादिनारूपाद्यभावस्यापितादृशधर्मावच्छिन्नाभाववत्तयातद्‌समवेतत्वाभावस्य
नित्यरूपादिनिष्ठस्यहेतावसत्त्वादव्याप्तिरतोव्याप्यवृत्तिपदंनचतस्यापिव्याप्यवृत्तित्वादुक्तदोषतादवस्थ्यंयत्प्रतियो
गिताकाभावेस्वावच्छेदकसंबंधेनस्वावच्छेदकधर्मावच्छिन्नवद्वृत्तित्वस्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वस्यचद्वयो
र्व्यतिरेकःसाध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावस्योक्तत्वात्नित्यत्वादिनारूपाद्यभाव

स्य च व्यधिकरणधर्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वाद्यवच्छिन्नवृत्तित्वादेर्व्युदासः एतेन संयोगाभाव
त्वादेः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया प्रतियोगिवैयधिकर[illegible]ायाघटितसाध्यव्यापकतानवच्छेदकत्वेपि न
४९ व्याप्यवृत्तित्वदवैयर्थ्यमिति ध्येयं ननु वह्निमान्धूमादित्यादावालोकावृत्तित्वादिना साध्याभाववद्वृत्तित्वाभावो याव
दंतर्गतः संयोगादिसंबंधावच्छिन्नवह्निसामान्याभाववद्वृत्तित्वस्यापि आलोकावृत्तिमध्यनिवेशादेवइंधनत्वाद्यवच्छिन्न
वह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेर्महानसवृत्तित्वत्वादिनायोऽभावस्तस्योपि साध्याभाववद्वृत्तित्वाभावो याव
दंतर्गततया धूमादावसत्वादिसंभवइत्यतआह तद्वृत्तित्वाभावो पात्वादिना भिन्नलक्षणइवात्रापि तत्साध्याभाववद्वृत्तित्वा
भावो व्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वप्रवेशेन आलोकावृत्तित्वाद्यवच्छिन्नाभावस्य हेतावसत्वाद्वह्निमान्धू
मादित्यत्र अव्याप्तिरतो अन्यथा व्याचष्टे स्वव्यापकेति स्वं प्रतियोगितातद्व्यापकीभूतं यत्तत्साध्याभाववद्वृत्तित्वं तद्व्याप
कप्रतियोगिताकाइत्यर्थः व्यधिकरणधर्मावच्छिन्नाभावसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधि
करणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यपि न व्याप्तिरतउक्तं तन्नादिति तथा च निर्धूमवृत्तित्वाभावस्यैव

स्वव्यापकत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकतयातस्य वह्न्यादावसत्वान्नातिव्याप्तिरिति भावः स्वनिष्ठवृत्तित्वत्वरू
पेण वृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नाभावसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेत्वंतरवृत्तेस्समस्मिन्न
सत्वात्सद्धेतुमात्र असंभवापत्तेरतः कल्पांतरमाह तत्वादिति समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य यावदभावस्यैव व्यभिचा
रित्वापत्तिप्रसक्तत्वादतिरिक्तांतरं तत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणध
र्मतया तदवच्छिन्नसामान्याभावमादायातिव्याप्तिव्याप्तेर्वारणायोगात् तत्वादित्युक्तं न चैवमपि व्यधिकरणधर्मावच्छिन्नद्रव्यत्वाभा
ववद्वृत्तित्वत्वेन घटवृत्तित्वजातित्वान्यतरस्य घटादिवृत्तेरभावमादाय द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः हेतुतावच्छेदकसंबंधाव
च्छिन्नवृत्तित्वभिन्नावृत्तित्वेनापि प्रतियोगितायाविशेषणीयत्वात् अत एव तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावादुक्तौ
वाच्यं शेयत्वादित्यादौ अव्याप्तिः साध्याभाववद्वृत्तित्वत्वावच्छिन्नं यद्धेतुताघटकसंबंधावच्छिन्नवृत्तिताभिन्नावृत्तिप्रतियोगित्वं ता
दृशप्रतियोगिताकस्य वृत्तिमद्वृत्त्यभावस्याप्रसिद्धेरतो निषेधद्वयगर्भता तेन घटत्वादिनानादृशवृत्तित्वाभावमादायैव तत्र लक्षणास
गतिः केचित्तु यद्यपि तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नायावंतोऽभावाइत्येव लाघवादुक्तौ मुचितं तथापि वाच्यप्रमेयादि

त्वादेतादात्म्येन हेतौ जगत एव तादात्म्यसाध्याभाववत्तादात्म्यतया तादृशतादात्म्यत्वावच्छिन्नाभावाप्रसिध्या अव्याप्तिरतो निषेध
दृश्यगर्भता इयं च विरुद्धघटत्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावस्सुलभ इत्याहुः यत्नुवृत्तित्वत्वमपेक्ष्य गुरोर्वाच्यत्वाभाववद्वृत्तित्वस्य
५० प्रतियोगितानवच्छेदकतया केवलान्वयिन्यव्याप्तिभियात तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावान्नोक्ता इति तन्तुच्छं गुरुधर्मस्य प्र
तियोगितावच्छेदकत्वमादृत्यैवलक्षणाकरणादन्यथा एतल्लक्षणे वृत्तिमत्वस्य दैवग्यपत्तेः वृत्तित्वमात्रस्य तत्साध्याभाववद्
वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मतया तदवच्छिन्नसाध्याभाववद्वृत्तित्वावच्छिन्नसामान्याभावमादाय व्याप्त्यसंभवात् किं च गु
रुधर्मस्यानवच्छेदकत्वे तद्धटभिन्नं द्रव्यत्वादित्यादौ वह्निव्याप्तिरपि स्यात् तद्धटवृत्तित्वापेक्षया गुरुत्वात् तद्धटभेदाभाववद्वृत्तित्वे
नावच्छिन्नाभावाप्रसिद्धेस्तद्धटवृत्तित्वस्य च साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मत्वाच्च तयातदवच्छि
न्नाभावस्य लक्षणाघटकत्वादेवं स्नेहशून्यं द्रव्यत्वादित्यादौ स्नेहशून्यत्वाभाववद्वृत्तित्वे जलवृत्तित्वलाघवेपेक्षया गुरु
त्वेन तदवच्छिन्नाभावाप्रसिध्याव्याप्तिव्याप्तिर्द्रष्टव्या। इति दिक् यस्यकस्यचित्सामानाधिकरणस्य व्यावर्तकमतस्तत्प्रति
योगितासमानाधिकरणत्वनिवेशापेक्षया लाघवमनुसृत्याह वृत्तित्ववृत्तिनावृत्ति साध्याभाववद्वृत्तित्ववृत्तिनावृत्ति

पाठे साध्याभाववत्त्वस्यैव संबन्धतायां तथापि वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वादिसामान्याभावस्य च या
वदन्तर्गतस्य हेतावसत्त्वाद्वह्निमान्धूमादित्यादौ सर्वत्रासंभवस्तादृशधर्मावच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावविवक्षणे
पि घटभेदत्वेन घटभेदनिर्वाहेऽपि वृत्तित्वान्यतराभावस्य हेतावसत्त्वात्। तथापि पूर्ववदत्रापि कल्पे हेतुताघटकसंबन्धावच्छिन्न
वृत्तित्वभिन्नावृत्तित्वेन प्रतियोगित्वं विशेषणाव्याप्यमित्यदोषः स्वन्यूनवृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगितायाः व
तादृशवृत्तित्वत्वातिरिक्तवृत्तित्वनिष्ठधर्मानवच्छिन्नत्वं विवक्षितमित्यपि कश्चित्। वृत्तित्ववृत्तिना धर्मेणावेति पाठे तु धूमत्वा
द्यभावमादायासंभवो भयादेव धर्मेणावेति कल्पान्तरोल्लेखः। तथा च धूमत्वत्वघटभेदत्वादेस्तादृशवृत्तित्वत्वातिरिक्तधर्मत्वा
देवतदवच्छिन्नसामान्याभावमादाय नासंभवो वाच्यं प्रमेयादित्यादौ तु तादात्म्येन हेतौ विरुद्धघटत्वपटत्वाभ्यामवृत्तिग
गनादिना वावृत्तित्वाभावमादाय लक्षणसमन्वय इति ध्येयं स्वव्यापकेत्यत्र साध्याभाववद्वृत्तित्वेत्यस्य व्याप्तिवृत्तिमहत्त्वा
लोकाद्यवृत्तित्वेनेति निर्वाहे वृत्तित्वस्येति प्रतियोगितायां तत्र साध्याभाववद्वृत्तित्वत्वव्यापकत्वप्रकारदर्शनार्थं न च
स्वव्यापकवृत्तित्वत्वव्यापके त्वदुक्तौ वव्याप्यालोकावृत्तित्वावच्छिन्नाभावस्यावारणासंभवात्प्रतियोगिताव्यापकत्वदिशि

तत्तत्साध्याभाववत्त्वस्य प्रवेशो व्यर्थ इति वाच्यं आलोकाववृत्तित्वाभावमादायाव्याप्तिवारणार्थं तस्यावश्यकत्वात् स्वसमाना
धिकरणात्यन्ताभावाप्रतियोगितत्तत्साध्याभाववद्वृत्तित्वत्वाश्रयनिष्ठात्यन्ताभावाप्रतियोगिप्रतियोगिताकत्वरूपपर्यवसि
५१ तार्थे तत्तत्साध्याभाववत्तः सकृदेव विनिविष्टतया वैयर्थ्यस्यैव शंकानवकाशाच्चेति भावः तत्तत्साध्याभाववद्वृत्तित्वत्वव्याप
कप्रतियोगिताक इत्यस्य फलमाह यच्चेत्यादिना घटत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात् तदवच्छिन्नवह्न्याद्यभावस्य
लक्षणाघटकत्वादुक्तमिंधनत्वेति रेधनत्वावच्छिन्नसामान्याभावस्य महानसादावसत्त्वात् तमादाय पक्षतिविरहादह व
ह्न्यभावेति तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वस्यानुक्तावसंभवः स्यात् ननु वह्निमान् धूमादित्यादावव्याप्तिमात्रं प्र
मेयमात्रस्य हेतुतास्थलेपि तत्तत्प्रमेयनिष्ठवृत्तित्वाभावस्य प्रमेयान्तरवृत्तेस्तत्प्रमेये विरहादित्येवमावेदयितुं सर्वसाधारण्ये
नाह स्वनिष्ठेति स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सामान्याभावस्येत्यर्थः अत्र घटत्वादौ साध्ये स्विष्यविशेषणतया घटा
न्यत्वादिहेतावतिव्याप्तिः साधनस्यैव हेतुतावच्छेदकसंबंधेन वृत्तिमत्तया तन्निष्ठस्य यावदभावस्यैव हेतौ सत्त्वात् न चैतस्य
विरुद्धत्वात् साध्यसमानाधिकरणत्वेन हेतुविशेषणादेव नातिव्याप्तिरिति वाच्यं तथापि द्रव्यत्वादौ साध्ये स्विष्यसमवा

यादिज्ञासत्वादिहेतावतिव्याप्तिःतादृशसंबंधेनहेतोरेववृत्तिमत्तयातन्निष्ठस्ययावद्भावस्यसाध्यसमानाधिकरणस्यच
हेतौसत्वात् एवंमहाकालान्योघटादिरत्रकालिकसंबंधेनहेतौवर्तिव्याप्तिर्हेतुताघटककालिकसंबंधेनमहाकालवृ
त्तेरस्तीनसंबंधेनतद्वृत्तित्वासंभवात् सामानाधिकरण्यस्यव्याप्यवृत्तित्वादन्यथाघटादिहेतावपिखंडकालावच्छेदेनमहा
कालवृत्तित्वाभावसत्वादुक्तावतिव्याप्तिर्नादवस्थ्यात् एवंद्रव्यत्वादेःकालिकसंबंधेनसाध्यतायामवृत्तिगगनादिहेतौअतिव्या
प्तिर्विशिष्टसत्तायामव्याप्तिश्चद्रव्यान्यस्मिन्गुणादौविशिष्टसत्तायावृत्तिमत्वादितिवदंतियदिचवृत्तिमद्वृत्तयोयावंतःसाध्या
भाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणतासामान्यकत्वमितिविवक्ष्यतेतथानैतेषामेकोदोषःपद मादधातिवृत्ति
मद्वृत्तयइत्यादौसर्वत्रदैशिकविशेषणतासंबंधेनैववृत्तेर्निवेशनियमस्यादन्यथाअधिकरणत्वमात्रस्यैवसंयोगादिसंबंधेना
वर्तमानत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरपिप्रसंगादितिध्येयंकूटपदप्रवेशेनसार्वभौमिय्यंलक्षणंपरिष्कुर्वन्नाह अन्ये
त्विति अत्रसाध्याभाव[redacted]कूटाधिकरणावृत्तित्वस्यघटत्वादिनाअभावमादायव्यभिचारिण्यतिव्याप्तिरतउक्तंयावंत
इतितथाचतादृशवृत्तित्वसामान्याभावस्यैवात्रहेतावसत्वान्नातिप्रसंगःनचतादृशवृत्तित्वत्वावच्छिन्नाभावत्वेनापिता

दृशाभावव्युदासस्संभवदिति वाच्यं तत्रापि तादृशवृत्तित्वेन घटादेरभावमादायातिव्याप्तितादवस्थ्यात् तादृशवृत्तित्वस्यगु
रुतयातदवच्छिन्नाभावाप्रसिद्धेः अत एव तादृशवृत्तित्वसामान्याभाववत्वमपि न विवक्षितं केवलान्वयिन्यव्याप्तेर्वाच्यत्वा
भावकूटाधिकरणवृत्तित्वसामान्याभावस्य ज्ञेयत्वादिहेतावभावादिति भावः इत्थमपि वाच्यत्वाभावकूटाधिकरणवृत्तित्वसामा
न्याभावस्यैव यावदंतर्गतस्य ज्ञेयत्वादिहेतावसत्वादिदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिरतो वृत्तिमद्वृत्तपदमित्युक्तं तथाचैतस्य
वृत्तिमद्वृत्तित्वान्नोनिरुक्तयावदंतर्गतत्वं किंतु घटत्वादिनानातादृशवृत्तित्वाभावस्यैवसत्त्वज्ञेयत्वादिहेतौ वर्तमानएवेतिना
व्याप्तिः अत्र वृत्तिमत्वादिकं पूर्वलक्षणादिशा अवसेयं तेन न प्रागुक्तदोषः ननु प्रलयभिन्नो गोत्वादित्यादौ कालिकसंबंधे
न हेतावतिव्याप्तिर्महाकालस्यापि कालिकसंबंधेन प्रलयान्यत्वाभावकूटवत्वेन तत्र याहेतुताघटककालिकसंबंधेन
वृत्तिस्तस्याव्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात् न च दैशिकविशेषणतया साध्याभावकूटवत्वं विव
क्षितं तादृशकूटाधिकरणप्रलयवृत्तित्वसामान्याभावस्याधुनिकघटादिवृत्तेर्गोत्वादिहेतावसत्वान्नातिव्याप्तिरि
तिवाच्यं घटत्वाभाववान्पटत्वादित्यादावभावसाध्यके अव्याप्तिप्रसंगात् साध्याभावकूटांतर्गतस्य घटत्वरूपसाध्याभाव

स्यविशेषणतयाधिकरणाप्रसिद्धेर्विशेषणतयावृत्तिमत्तामेवसाध्याभावानांप्रवेशेतुघटत्वाभाववान्द्रव्यत्वादित्यादाव
तिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैवतत्रदैशिकविशेषणतयावृत्तिमत्तयातत्कूटाधिकरणावृत्तित्वाभाव
स्यापितादृशधर्मावच्छिन्नस्यैववृत्तिमद्वृत्तित्वादेर्वैकालिकसंबंधावच्छिन्नप्रतियोगिताकेगगनत्वाद्यभावस्याभावेसाध्येता
नादिहेतावव्याप्तिरगगनत्वाभावघटितकूटस्यदैशिकसंबंधेनयदधिकरणंतद्वृत्तित्वसामान्याभावस्यवृत्तिमत्तिश
द्वादेरप्रसिद्धस्यज्ञानादिहेतावभावादितिचेन्नसाध्यतावच्छेदकसंबंधेनस्वप्रतियोगितावच्छेदक [redacted] विशिष्टसाध्य
वृत्तिमतः वत्त्वबुद्धेःसंसर्गविधयाप्रतिबंधकतावच्छेदकोयःसंबंधस्तेनैवसाध्याभावकूटाधिकरणत्वस्योक्तत्वात्केवलान्वयिनि स्यतेनैवा
चतादृशप्रतियोगितावच्छेदकविशिष्टसाध्यवत्त्वबुद्धिभ्रमरूपैवसुलभासत्त्वांहिघटत्वेनवाच्यत्वेनास्तीतिबुद्धौजा
त्वपिघटत्वेनवाच्यमस्तीतिज्ञानानुदयात्घटत्वाद्यभाववत्ताबुद्धिंप्रतिचसमवायादिनाघटत्वादिमत्तानिश्चय
स्यप्रतिबंधकत्वादेवोक्ताव्याप्तेर्व्युदासःतादृशावृत्तित्वव्यापकप्रतियोगिताकत्वेप्रवेशितएवसमुदायपरंसार्थक
मवत्यतःप्रागेववृत्तित्वाभावंव्याचष्टेतादृशेतिस्वप्रतियोगितानव्यापकंयत्साध्याभावकूटवद्वृत्तित्वंतद्व्यापकप्र
५ संयोगाभाववान्मेयत्वादित्यादौचसंयोगादिरूपःसाध्याभावोनतादृशसंबंधेनवृत्तिमान्निरवच्छिन्नसमवायसंबंधे
नैवसंयोगादिनिश्चयस्यतद्भावधीविरोधित्वादत्तोनतत्राव्याप्तिः४॥५

तियोगिताकइत्यर्थः प्रयोजनं चेति वह्निमान्धूमादित्यत्र आलोकावृत्तिसामान्याभावस्य साध्याभावकूटाधिकरणावृत्तित्व
व्यापकप्रतियोगिताकस्य यावदंतर्गतस्य हेतावसत्वात् अव्याप्तिरतस्स्वव्यापकेति तथा च आलोकावृत्तित्वावच्छिन्नाभा
वप्रतियोगित्वस्य च व्यापकं न निर्वह्निवृत्तित्वे धूमत्वादौ व्यभिचारादित्ययमभावो न लक्षणघटक इति नाव्याप्तिः शु
प्रतियोगितायां तादृशवृत्तित्वव्यापकत्वानुक्तौ वाच्यं ज्ञेयत्वादित्यादौ अव्याप्तिः स्वप्रतियोगिताव्यापकसाध्याभा
वकूटवद्वृत्तितात्वकस्य घटवृत्तित्वसामान्याभावस्यैव यावदंतर्गतस्य हेतावसत्वात् तदुपादाने च तादृशाभावप्रतियो
गित्वं न वाच्यत्वाभावकूटवद्वृत्तितात्वव्यापकं पटवृत्तित्वे व्यभिचारादित्यतस्य लक्षणाघटकत्वान्नाव्याप्तिरिति भा
वः अत्र च प्रतियोगितास्वन्यूनवृत्तिधर्मानवच्छिन्नात्वग्राह्या तेनेदं वाच्यं ज्ञेयत्वादित्यादौ घटवृत्तित्वेन वृत्तित्व
सामान्याभावस्यापि घटान्यत्वादिवृत्तेर्हेतुतावसत्वेऽपि नाव्याप्तिः सार्वभौममते चैकविशिष्टापरत्वमेवोभयत्वे ति
न घटवृत्तित्वघटान्यवृत्तित्वोभयाभावमादायापि नासंभवः तत्प्रतियोगितायाः तादृशवृत्तित्वव्यापकत्वादि
ति ध्येयं स्वव्यापकत्वदलस्य पूर्वलक्षणोक्तैव व्यावृत्तिस्तादृशवृत्तित्वव्यापकत्वदलस्य तु नप्रागिव वह्निमान्धूमा

दित्यादौ व्याप्तिस्तत्र महानसादेः साध्याभाववत्कूटाधिनधिकरणत्वात् किंतु केवलान्वयिस्थल एवेत्याशयेनाह प्राय
मिति। न च स्वव्यापकत्वाद्यपेक्षया लाघवात् साध्याभावकूटाधिकरणावृत्तित्वावच्छिन्नाभावाविषयावंतः निवेश्यतां तादृशव
त्तित्वेन घटाभावमादायैव केवलान्वयिनि लक्षणासंभवादिति वाच्यं वह्निमान् धूमात् वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रासंभवाप
त्तेः निर्वह्निवृत्तित्वस्य वृत्तित्वाद्यपेक्षया गुरुत्वेन वह्न्यभावकूटवद्वृत्तित्वत्ववाच्यत्वाभावकूटवद्वृत्तित्वादेः प्रतियोगितानवच्छेद
कत्वेन तदवच्छिन्नाभावस्याप्रसिद्धेरिति भावः। ननु वृत्तिमद्वृत्ति यो यावंतः साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभा
वास्तद्वत्त्वमेवोच्यतां कृतं कूटपदनिवेशेनेत्यत आह साध्याभावेति साध्यप्रतियोगिकाभावेत्यर्थः व्यधिकरणेति साध्यप्रतियोगि
काभाववद्वृत्तित्वसामान्याभावस्य वृत्तिमात्रनिष्ठत्वादिति भावः। अत इति तथा च धूमाभावकूटाधिकरणावृत्तित्वव्यापकप्रति
योगिताकस्यानिर्धूमवृत्तित्वसामान्याभावस्यैव वह्न्यादिहेतावसत्वान्नव्यभिचारिणि अतिव्याप्तिः न चैवं गगनाभाववान्
वाच्यत्वादित्यत्राव्याप्तिः गगनस्यापि साध्याभावतया तदधिकरणाप्रसिद्धेरिति वाच्यं वृत्तिमत्त्वेनापि साध्याभावस्य विव

स्वराप्यत्वात् न व्यमते गगनस्य साभावविरहत्वेमानाभावाच्चेति भावः अत्र साध्याभावसमुदायाधिकरणावृत्तित्वव्यापकप्र
५४ तियोगिकेत्यत्र समुदायपदस्य फलं ग्रंथकृतैवोक्तं प्रतियोगिताव्यापकसाध्याभावसमुदायाधिकरणावृत्तित्वमित्यत्र समुदाय
पदस्य फलं तु नालोकावृत्तेर भावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणं तादृशाभावस्य स्वव्यापकवृत्तित्वेत्युक्त्या
पिवारणसंभवात् धूमत्वादावपितदभावप्रतियोगितासत्वात् परं त्वालोकावृत्तित्ववृत्तित्वस्याभावमादाया व्याप्तिवारणमेव न फलमि
ति प्रांचः तन्तुच्छं स्वाश्रयनिष्ठात्यंताभावाप्रतियोगिनः साध्याभावकूटाधिकरणावृत्तित्वस्याश्रये वर्त्तमानस्यात्यंता[redacted]भाव
स्याप्रतियोगि प्रतियोगिताकाभावत्वेनैव तादृशवृत्तित्वाभावानां निवेशात्तत्र च सकृदेव समुदायस्यांतर्भावेन उभयथापि तन्नि
वेशफलानुसंधानस्य वा पसद्दशनानुसंधानत्वात् अन्यथा साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिक
रणधर्मावच्छिन्नाभावस्य प्रतियोगिता व्यापकसाध्याभावकूटवद्वृत्तित्वकत्वाभावादेव व्युदासात्तमादाय व्यभिचारिण्य
तिव्याप्रसंगवारणार्थं ग्रंथकृता समुदायपदोपन्यासो नोचितः स्यादपत्तेरिति ध्येयं धूमइति नातिव्याप्तिरित्यनेनान्वयः ९०

मतेऽपि नतु संबंधविशेषाविवक्षायां प्रलयोत्पन्नकर्मनित्यरूपादिकमेव वह्न्यभावकूटाधिकरणं वाच्यं जन्यविभुमूर्त्तानां
यथायोगं कालिकसंयोगादिकृतविशेषणताभिर्वह्निमत्वेन द्रव्यस्य साध्याभावकूटत्वविरहात् वह्निसमानकालिनस्य धूमासं
योगिद्रव्यस्यासत्वात् तथा च तत्र साध्याभावकूटवति हेतुतावच्छेदकसंयोगसंबंधेन वृत्त्यप्रसिद्ध्यैव धूमेनातिव्याप्तिः समुदाये
न धूमस्य हेतुत्वे च विरुद्धत्वादेव तद्व्युदासस्संभवादत आह संयोगेन चेति तथात्वे वह्नेः साध्यत्वे तथा चात्र वह्न्यभावकूटाधिकरणं
यन्नित्यरूपादिकं हेतुताघटकसमवायसंबंधेन तद्वृत्तित्वस्य रूपत्वादौ प्रसिद्धस्याभावो वर्त्तत एवेति वह्न्यवयवत्वेऽतिव्या
प्तिस्स्याद्यदि साध्यतावच्छेदकसंबंधेन साध्याभावस्य प्रवेशो न स्यादिति भावः न तु समवायेन वह्न्यभावस्य वह्न्यवयवत्वास
मानाधिकरणत्वात् वक्ष्यमाणेन साध्याभावानां हेतुसमानाधिकरणत्वविशेषणेनैव न तादृशाभावमंतर्भाव्यो न हेता
वतिव्याप्तिरतो हेत्वंतरमाह पर्वतेति अत्र समवायेन वह्न्यभावस्य पर्वते संयोगेन वह्न्यभावस्य च वह्न्यवयवे हेतुसमानाधिक
रणत्वात् तादृशोभयाघटितेति साध्याभावकूटस्याधिकरणं यन्नित्यरूपादिकं तत्समवेतत्वाद्यभावस्य तादृशसंयोगहेतौ

सत्वाद्द्रव्यत्यतिव्याप्तिः यत्तु संयोगेन वह्नेः साध्यत्वे वह्न्यवयवत्वस्याविरुद्धत्वेन हेतोः साध्यसामानाधिकरण्यविशेषणादेव तद्वा
५५ रयितुं शक्यत इत्यतः पर्वतत्वादिहेत्वंतरमिति तन्न तुच्छं वह्न्यवयवत्वे च संयोगेन वह्न्यंतरस्य वृत्त्याविरोधविरहात् तादात्म्येन सा
ध्यत्वानुरोधात् साध्यसंबंधितामात्रस्यैव सामानाधिकरण्ये प्रवेश्यत्वाच्चेति भावः संबंधद्वयेति पर्वतस्य संयोगावच्छिन्नव
ह्न्यभावानधिकरणत्वात् वह्न्यवयवस्य च समवायावच्छिन्नवह्न्यभावानधिकरणत्वादिति भावः जातिव्याप्तिरिति प्रागुक्त
रीत्या साध्याभावकृत्यधिकरणे नित्यरूपादौ हेतुताघटकसंयोगसंबंधेन वृत्त्यप्रसिध्या वह्निमान् धूमादित्यादावव्याप्ति
र्नैत्यपि द्रष्टव्यं अत्र च वृत्तित्वनियामकसंबंधस्य प्रतियोगितावच्छेदकमते एव इदमुक्तं तेन धनि चैत्रत्वादित्यादौ स्व
त्वादिसंबंधेन साध्यतायां नाव्याप्तिः साध्यतावच्छेदकसंबंधातिरिक्तसमानाधिकरणसंसर्गानवच्छिन्नप्रतियोगिताक
साध्याभावो ग्राह्य इति तु न युक्तं धनि द्रव्यत्वादित्यादौ व्यधिकरणसंबंधावच्छिन्नसाध्याभावस्यैव तादृशत्वेनातिव्याप्ति
प्रसंगात् ननु यदि साध्याभावः साध्यतावच्छेदकरूपेण विवक्षितस्तदा प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तिः प्रमेयत्वाव

छिन्नप्रतियोगिताप्रसिद्धेः नच साध्यतावच्छेदकातिरिक्तसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावत्वस्य साध्या
भावो वक्तव्यस्तथाचावृत्तिगगनादिना प्रमेयादेरभावत्वत्तत्साध्याभावस्सुलभ इति वाच्यं घ्राणग्राह्यगुणवान् द्रव्यत्वा
दित्यादावतिव्याप्तिप्रसंगात् तत्र दृशगुणस्य तत्स्वामाह्यत्वांशत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया व्यधिकरणधर्मा
वच्छिन्नाभावानामेवतादृशसाध्याभावत्वादत आह स्वेति पक्षप्रतियोगिताप्रतियोगिताव्यापकसाध्यतावच्छेदकेत्यस्य फल
माह पृथिवीत्वाभावादाविति तत्तद्विपक्षो घटादिस्तथाच घटावृत्तित्वावच्छिन्नाभावपटावृत्तित्वावच्छिन्नाभावादिघटि
तसाध्याभावकूटाधिकरणाप्रसिध्या पृथिवीत्वाभाववान् जलत्वादित्यादौ नाव्याप्तिः घटावृत्तित्वावच्छिन्नाभावप्रति
योगितायाः पटत्वादावपि सत्वेन साध्यतावच्छेदकस्य तद्व्यापकतया तादृशाभावानां लक्षणाघटकत्वात् प्रतियोगिभे
देऽपि एकधर्मावच्छिन्नप्रतियोगिताया एकत्वादिति भावः सद्धेताविति नाव्याप्तिरित्यन्वयः वह्निमान् धूमादित्यत्र सा
ध्यतावच्छेदकसंयोगसंबंधेन विपक्षीभूततत्तज्जलावृत्तित्वावच्छिन्नाभावकूटस्य गुणादौ द्रव्यं [illegible]थिवीत्वादि
त्यत्र विपक्षीभूतरूपरसादिप्रत्येकासमवेतसामान्याभावकूटस्य जात्यादावधिकरणतासत्वात्तदप्रसिद्धिर्निर्वंध
नाव्याप्तेरुक्तस्थले विरहात्तदुभयं नोदाहृतं ननु यावंतमेकाधिकरण्यं तावत्समुदायस्य विवक्षायां नोक्ताव्याप्ति

रत आह पृथिवीत्वादाविति साधनसमानाधिकरणत्वेन साध्याभावस्य विवक्षणीयत्वेन जातित्वावच्छिन्नाभावमादाय
नातिव्याप्तिसंभव इत्यादिपरमुपात्तं तथा च जलत्वसमवेतत्वावच्छिन्नाभावस्य तेजासमवेतत्वावच्छिन्नाभावस्य च साधनसा
५६ मानाधिकरणत्वात्तदुभयघटितसाध्याभावकूटाधिकरणे जात्यादौ प्रकृतहेतोरसत्त्वादतिव्याप्तिरिति भावः द्रव्यत्वसमवा
येन हेतुत्वे तादृशसाध्याभावकूटाधिकरणे जात्यादौ हेतुतावच्छेदकीभूतसमवायसंबंधेन वृत्यप्रसिद्ध्यैव नातिव्याप्तिस्या
दत उक्तं द्रव्यत्वप्रकारकेति सामान्यादौ च स्वरूपसंबंधेन वृत्तिर्वाच्यत्वादावेव सुलभा प्रमाविशेष्यत्वादावितिनातिव्याप्ति
रित्यन्वयः तादृशप्रतीतिविषयत्वं भ्रमामादाय जात्यादावपि त्यत आह प्रमेति अत्र प्रतियोगितां प्रतिव्यापकत्वं साध्यतावच्छे
दकतावच्छेदकसंबंधेनैव ग्राह्यं तेन नित्यज्ञानवत्तत्तादात्म्येन साध्यतायामीश्वरत्वादिहेतौ घटान्यभेदस्य घटान्यभेद
स्य च द्वयोर्विषयतासंबंधेन प्रतियोगिताव्यापकीभूतनित्यज्ञानयोरेकाधिकरणाप्रसिद्धावपि नाव्याप्तिः न वा तादृ
शद्रव्यसाध्ये द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यत्र पृथिव्यादौ साध [redacted] सामानाधिकरणस्य
पृथिव्यादिनवद्रव्याणां प्रत्येकभिन्नभेदकूटस्याधिकरणे गुणादौ हेतोरसत्त्वेऽप्यतिव्याप्तिः न चैवं वह्निधूमोभयाभावा
न् धूमादित्यत्राव्याप्तिः प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन तांप्रतिपर्याप्त्याख्यसाध्यतावच्छेदकताघय

कसंबंधेनकस्याव्यापकतयानिरुक्तसाध्याभावाप्रसिद्धेरितिवाच्यं एकविशिष्टापरत्वानतिरिक्तस्योभयत्वस्यसार्वभौम
मतेपर्याप्तिभिन्नसंबंधेनैवसाध्यतावच्छेदकत्वादितिभावः साध्यतावच्छेदकव्यापिकाप्रतियोगितेत्यस्यफलमाह नापीति
घटत्वाभावत्वेनसाध्यत्वेनसाध्याभावकूटवत्वं घटस्यैवसुलभमतउक्तं अभावत्वादिनेति आदिनाप्रमेयत्वाद्युपग्रहः तं
याच अभाववान्प्रमेयवान्वाघटत्वादित्यत्रसाधनसमानाधिकरणस्यतत्तद्घटान्यत्वाभावकूटस्याधिकरणाप्रसिध्या
अव्याप्तिस्स्यादतस्साध्यतावच्छेदकव्यापकेतिसाध्यतावच्छेदकीभूताभावत्वादिव्यापकप्रतियोगिताकत्वाभावादेवतत्तद्घटान्य
त्वाभावानांलक्षणाघटकत्वमितिभावः न्यूनवृत्तिधर्मानवच्छिन्नायाश्चप्रतियोगितायासाध्यतावच्छेदकसमनैयत्यत्वंवा
च्यं तेनघटत्वाभावत्वेनपटत्वाभावत्वेनप्रमेयसामान्याभावयोरेकाधिकरणाप्रसिध्यापिनोक्ताव्याप्तितादवस्थ्यं घटत्वाभा
वत्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितान्यूनवृत्तित्वेनतादृशप्रतियोगिताकानांलक्षणाघटकत्वादेवंसाध्यसमाना
धिकरणायमपिहेतौवक्तव्यं तेनसत्तावत्समवेतत्वसमनियतप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नाभावस्यैववृ
त्तिमद्वृत्तित्वात्तादृशस्यचयावतएवहेतौसत्वेपि जात्यभाववान्द्रव्यत्वादित्यादौविरुद्धहेतौनातिव्याप्तिरिति ध्येयं यद्य
पिघटवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्यघटान्यवृत्तित्वविशिष्टवाच्यत्वाभावस्यचयाद्वयोरेकाधिकरणाप्रसिध्या

112/3

५८

वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः न च घटादिवृत्तित्वविशिष्टवाच्यत्वत्वं न प्रतियोगितावच्छेदकं तदपेक्षया लघोर्घटा
दिवृत्तित्वविशिष्टत्वस्यैव तथात्वात्तादृशविशिष्टत्वाद्यवच्छिन्नाभावानां च साध्यतावच्छेदकसमव्याप्तप्रतियोगिताक
त्वाभावादेव व्युदासो घटवृत्तित्वविशिष्टवस्तुमात्रस्यैव तत्प्रतियोगितासत्वादिति वाच्यं वाच्यत्वनिष्ठाधेयताविशेष
णघटाद्यवच्छिन्नप्रतियोगिताकाभावस्य तादृशसंबंधेन घटान्यावच्छिन्नप्रतियोगिताकाभावस्य च द्वयोस्तथाप्यधि
करणाप्रसिद्ध्या अव्याप्तितादवस्थ्यात् न चाधेयताविशेषेण घटादेः प्रतियोगितावच्छेदकत्वे मानाभावस्तस्यत्वसाध्य
वत्त्वं वाच्यत्वादन्यथा घटवृत्तित्वविशिष्टवाच्यत्ववान् द्रव्यत्वादित्यादौ अतिव्याप्त्यापत्तेर्गुरुतरत्वात्तादृशवाच्यत्वत्वा
वच्छिन्नाभावस्याप्रसिद्ध्या घटवृत्तित्वविशिष्टं वाच्यत्वावच्छिन्नाभावस्य च साध्यतावच्छेदकसमनियतप्रतियोगिताक
त्वाभावेन व्यधिकरणधर्मावच्छिन्नस्यैव घटवृत्तित्वविशिष्टवाच्यत्वाभावस्य लक्षणे घटकत्वात्तथापि दूषणमिदं स्फुट
तयोपेक्ष्याह पृथिवीत्वेति ननु सार्वभौमानां मते विरुद्धयोरुभयत्वस्यातिरिक्तत्वेऽपि समानाधिकरणयोरेकविशिष्टापर
त्वमेवोभयत्वं तथा च पृथिवीत्वद्रव्यत्वोभयत्वमपि पृथिवीत्वविशिष्टद्रव्यत्वमेव साध्यतावच्छेदकीभूतं पर्यवसितमिति
तत्सम्भवियत्प्रतियोगिताकत्वाभावादेव तदुभयान्यतरत्वावच्छिन्नाभाव [redacted]

इति जागदीशी-"चतुर्दशलक्षणी"